
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

पं. ८ ॥
१८३

॥ नैषधमूलमिदंज्ञेयं ॥ ॥

॥श्रीगणेशाय नमः॥ ॥निपीय यस्य क्षितिरक्षिणः कथास्तथाद्रियंते न बुधाः सुधामपि॥ नलः सितच्छत्रितकीर्तिमंडलः स राशिरासीन्महसां महोज्वलः॥
॥१॥ रसैः कथा यस्य सुधावधीरणी नलः स भूजानिरभूद्गुणाद्भुतः॥ सुवर्णदंडैकसितातपत्रितज्वलत्प्रतापावलिकीर्तिमंडलः॥२॥ पवित्रमत्रात
नुते जगद्युगे स्मृता रसक्षालनयेव यत्कथा॥ कथं न सा मद्गिरमाविलामपि स्वसेविनीमेव पवित्रयिष्यति॥३॥ अधीतिबोधाचरणप्रचारणैर्दशाः
चतस्रः प्रणयन्नुपाधिभिः॥ चतुर्दशत्वं कृतवान्कुतः स्वयं न वेद्मि विद्यासु चतुर्दशस्वयं॥४॥ अमुष्य विद्या रसनाग्रनर्त्तकी त्रयीव नीतांगगुणेन
विस्तरं॥ अगाहितार्था दशतां जिगीषया न वद्वयद्वीपपृथग्जयश्रियां॥५॥ दिगीशवृंदांशविभूतिरीशिता दिशां स कामप्रसरावरोधिनीं॥ बभार शास्त्रा
णि दृशं द्वयाधिकां निजत्रिनेत्रावतरत्वबोधिकां॥६॥ पदैश्चतुर्भिः सुकृते स्थिरीकृते कृतेमुना के न तपः प्रपेदिरे॥ भुवं यदेकांघ्रिकनिष्ठया
स्पृशन्दधावधर्मोपि कृशस्तपस्विता॥७॥ यदस्य यात्रासु बलोद्धतं रजः स्फुरत्प्रतापानलधूममंजिम॥ तदेव गत्वा पतितं सुधांबुधौ दधाति पंकी
भवदंकतां विधौ॥८॥ स्फुरद्धनुर्निस्वनतद्घनाशुगप्रगल्भवृष्टिव्ययितस्य संगरे॥ निजस्य तेजः शिखिनः परः शता वितेनुरिंगालमिवायशः परे
॥९॥ अनल्पदग्धारिपुरानलोज्वलैर्निजप्रतापैर्वलयं ज्वलद्भुवः॥ प्रदक्षिणीकृत्य जयाय सृष्टया रराज नीराजनया स राजघः॥१०॥ निवारितास्ते
न महीतलेऽखिले निरीतिभावं गमितेतिवृष्टयः॥ न तत्यजुर्नूनमनन्यविश्रमाः प्रतीपभूपालमृगीदृशां दृशः॥११॥ सितांशुवर्णैर्वयति स्म तद्गुणै
र्महासिवेम्नः सहकृत्वरी बहु॥ दिगंगनांगावरणं रणांगणे यशः पटं तद्भटचातुरी तुरी॥१२॥ प्रतीपभूपैरिव किं ततो भिया विरुद्धधर्मैरपि भे
त्तृतोज्झिता॥ अमित्रजिन्मित्रजिदोजसा स यद्विचारदृक्चारदृगप्यवर्तत॥१३॥ तदोजसस्तद्यशसः स्थिताविमौ वृथेति चित्ते कुरुते यदा यदा॥
तनोति भानोः परिवेषकैतवात्तदा विधिः कुंडलनां विधोरपि॥१४॥ अयं दरिद्रो भवितेति वैधसीं लिपिं ललाटेर्थिजनस्य जाग्रतीं॥ मृषा न चक्रे
ल्पितकल्पपादपः प्रणीय दारिद्र्यदरिद्रतां नलः॥१५॥ विभज्य मेरुर्न यदर्थिसात्कृतो न सिंधुरुत्सर्गजलव्ययैर्मरुः॥ अमानि तत्तेन निजाय
शोयुगं द्विफालबद्धाश्चिकुराः शिरः स्थितं॥१६॥ अजस्रमभ्यासमुपेयुषा समं मुदैव देवः कविना बुधेन च॥ दधौ पटीयान्समयं नयन्नयं दिनेश्व
रश्रीरुदयं दिने दिने॥१७॥ अधोविधानात्कमलप्रवालयोः शिरःसु दानादखिलक्षमाभुजां॥ पुरेदमूर्ध्वं भवतीति वेधसा पदं किम

स्यं २

स्यांकितमूर्द्ध्वरेखया॥१६॥ जगज्जयं तेन च कोशमक्षयं प्रणीतवान् शैशवशेषवानयं॥ सखा रतीशस्य ऋतुर्यथा वनं वपुस्तथालिंगदथास्य यौ-
वनं॥१७॥ अधारि पद्मेषु तदंघ्रिणा घृणा क्व तच्छयच्छायलवोपि पल्लवे॥ तदास्यदास्येपि गतोधिकारितां न शारदः पार्वणशर्वरीश्वरः॥२०॥ किमस्य रो-
म्णां कपटेन कोटिभिर्विधिर्न रेखाभिरजीगणद्गुणान्। न रोमकूपौघमिषाज्जगत्कृता कृताश्च किं दूषणशून्यबिंदवः॥२१॥ अमुष्य दोर्भ्यामरिदु-
र्गलुंठने ध्रुवं गृहीतार्गलदीर्घपीनता॥ उरःश्रिया तत्र च गोपुरस्फुरत्कपाटदुर्धर्षतिरःप्रसारिता॥२२॥ स्वकेलिलेशस्मितनिंदितेंदुनो निजां-
शदृक्कर्जितपद्मसंपदः। अतद्द्वयीजित्वरसुंदरांतरे न तन्मुखस्य प्रतिमा चराचरे॥२३॥ सरोरुहं तस्य दृशैव निर्जितं जिताः स्मितेनैव विधोरपि श्रियः॥
कुतः परं भव्यमहो महीयसी तदाननस्योपमितौ दरिद्रता॥२४॥ स्ववालभारस्य तदुत्तमांगजैः समं चमर्येव तुलाभिलाषिणः॥ अनागसे शंसति वाल-
चापलं पुनः पुनः पुच्छविलोलनच्छलात्॥२५॥ महीभृतस्तस्य च मन्मथश्रिया निजस्य चित्तस्य च तं प्रतीच्छया॥ द्विधा नृपे तत्र जगत्त्रयीभुवां नतभ्रुवां
मन्मथविभ्रमो भवत्॥२६॥ निमीलनभ्रंशजुषा दृशा भृशं निपीय तं यस्त्रिदशीभिरर्जितः॥ अमूस्तमभ्यासभरं विवृण्वते निमेषनिःस्वैरधुना-
पि लोचनैः॥२७॥ अदस्तदाकर्णि फलाढ्यजीवितं दृशोर्द्वयं नस्तदवीक्षि चाफलं॥ इति स्म चक्षुःश्रवसां प्रिया नले स्तुवंति निंदंति हृदा तदात्मनः॥
विलोकयंतीभिरजस्रभावनाबलादमुं नेत्रनिमीलनेष्वपि॥ अलंभि मर्त्याभिरमुष्य दर्शने न विघ्नलेशोपि निमेषनिर्मितः॥२९॥ न क-
स्वप्नगतं ददर्श तं जगाद गोत्रस्खलिते च का न तं॥ तदात्मताध्यातधवा रते च का चकार वा न स्वमनोभवोद्भवं॥३०॥ श्रियास्य योग्याहमि-
ति स्वमीक्षितुं करे तमालोक्य सुरूपया धृतः॥ विहाय भैमीमपदर्पया कया न दर्पणः श्वाससमलीमसः कृतः॥३१॥ यथोह्यमानः खलु भोगभो-
जिना प्रसह्य वैरोचनिपुत्रपत्तनं॥ विदर्भजाया मदनस्तथा मनो नलावरुद्धं वयसैव वेशितः॥३२॥ नृपेनुरूपे निजरूपसंपदां दिदेश तस्मिन्बहु-
श्रुतिं गते॥ विशिष्य सा भीमनरेंद्रनंदिनी मनोभवाज्ञैकवशंवदं मनः॥३३॥ उपासनामेत्य पितुः स्म रज्यते दिने दिने सावसरेषु बंदिनां॥ प-
ठत्सु तेषु प्रतिभूपतीनलं विनिद्ररोमाजनि शृण्वती नलं॥३४॥ कथाप्रसंगेषु मिथः सखीमुखात्तृणेपि तन्व्या नलनामनि श्रुते॥ द्रुतं विधूया-
न्यदभूयतानया मुदा तदाकर्णनसज्जकर्णया॥३५॥ स्मरात्परासोरनिमेषलोचनाद्बिभेमि तद्भिन्नमुदाहरेति सा॥ जनेन यूनः स्तुवता तदा-
स्पदे निदर्शनं नैषधमभ्यषेचयत्॥३६॥ नलस्य पृष्टा निषधागता गुणान् मिषेण दूतद्विजबंदिचारणाः॥ निपीय तत्कीर्तिकथारसांम

मथानम

तं विरायतस्छे विमनायमानया॥३७॥ प्रियं प्रियां च त्रिजगज्जयिश्रियौ लिखाधिलीलागृहभित्तिकावपि॥ इति स्म सा कारुवरेण लेखितं नलस्य च
स्वस्य च सख्यमीक्ष्यते॥३८॥ मनोरथेन स्वपतीकृतं नलं निशि क्व सा न स्वपती स्म पश्यति॥ अदृष्टमप्यर्थमदृष्टवैभवात्करोति सुप्तिर्जनदर्शनातिथिं
॥३९॥ निमीलितादक्षियुगाच्च निद्रया हृदोपि बाह्येन्द्रियमौनमुद्रितात्॥ अदर्शि संगोप्य कदाप्यवीक्षितो रहस्यमस्याः स महन्महीपतिः॥४०॥ अ
हो अहोभिर्महिमा हिमागमेप्यभिप्रपेदे प्रति तां स्मरार्दितां॥ तपर्तुपूर्त्तावपि मेदसां भरा विभावरीभिर्बिभरांबभूविरे॥४१॥ स्वकांतिकीर्त्तिव्रजमौक्ति
कस्रजः श्रयंतमंतर्घटनागुणश्रियं॥ कदाचिदस्या युवधैर्यलोपिनं नलोपि लोकादशृणोद्गुणोत्करं॥४२॥ तमेव लब्ध्वावसरं ततः स्मरः शरीरशोभाज
यजातमत्सरः॥ अमोघशक्त्या निजयेव मूर्त्तया तया विनिर्जेतुमियेष नैषधं॥४३॥ अकारि तेन श्रवणातिथिर्गुणः क्ष्माभुजा भीमनृपात्मजाश्र
यः॥ तदुच्चधैर्यव्ययसंहितेषुणा स्मरेण च स्वात्मशरासनाश्रयः॥४४॥ अमुष्य धीरस्य जयाय साहसी तदा खलु ज्यां विशिखैः सनाथयन्॥ निमज्ज
यामास यशांसि संशये स्मरस्त्रिलोकीविजयार्जितान्यपि॥४५॥ अनेन भैमीं घटयिष्यतस्तथा विधेरबंध्येच्छतया व्यलासि तत्॥ अभेदि तत्तादृ
गनंगमार्गणैर्यदस्य पौष्पैरपि धैर्यकंचुकं॥४६॥ किमन्यदद्यापि यदस्त्रतापितः पितामहो वारिजमाश्रयत्यहो॥ स्मरं तनुच्छायतया तमात्मनः
शशाक शंके न विलंघितुं नलः॥४७॥ उरोभुवा कुंभयुगेन जृंभितं नवोपहारेण वयस्कृतेन किं॥ त्रपासरिद्दुर्गमपि प्रतीर्य सा नलस्य तन्वी हृदयं
विवेश यत्॥४८॥ अपह्नुवानस्य जनाय यन्निजामधीरतामस्य कृतं मनोभुवा॥ अबोधि तज्जागरदुःखसाक्षिणी निशा च शय्या च शशांक
कोमला॥४९॥ स्मरोपतप्तोपि भृशं न स प्रभुर्विदर्भराजं तनयामयाचत॥ त्यजंत्यसून् शर्म च मानिनो वरं त्यजंति न त्वेकमयाचितव्रतं॥५०॥ मृ
षाविषादाभिनयादयं क्वचिज्जुगोप निःश्वासततिं वियोगजां॥ विलेपनस्याधिकचंद्रभागताविभावनाच्चापललाप पांडुतां॥५१॥ शशाक निह्नोतुम
नेन तत्प्रियामयं बभाषे यदलीकवीक्षितां॥ समाज एवालपितासु वैणिकैर्मुमूर्च्छ यत्पंचममूर्च्छनास्वपि॥५२॥ अवाप सापत्रपतां स भूपतिर्जितेंद्रि
याणां धुरि कीर्त्तितस्थितिः॥ असंवरे शंबरवैरिविक्रमे क्रमेण तत्र स्फुटतामुपेयुषि॥५३॥ अलं नलं रोद्धुममी किलाभवन्गुणा विवेकप्रमुखा न चा
पलं॥ स्मरः स रत्यामनिरुद्धमेव यत्सृजत्ययं सर्गनिसर्ग ईदृशः॥५४॥ अनंगचिह्नं स विना शशाक नो यदासितुं संसदि यत्नवानपि॥ क्षणं त
दारामविहारकैतवान्निषेवितुं देशमियेष नैषधः॥५५॥ अथ श्रिया भर्त्सितमत्स्यलांछनः समं वयस्यैः स्वरहस्यवेदिभिः॥ पुरोपकंठं उपवनं कि

॥२॥

मत्से

श्री॰

वेहितां हरेश्चयानाय निदेशकारिणः ॥५६॥ अमीनतस्तस्य विस्तृचितं सितं जनेषु पिमाने पिचपौरुषाधिकं ॥ नृपाहरन्नम्रमजस्रखं वल्गैः रांचलैः सो हित
मंडुरोदरं ॥५७॥ अथांतरेणावटुगामिनाध्वना निशाथिनीनाथमहःसहोदरैः ॥ निगालमाद्देवमणेरिवोत्थितैर्विराजितं केसुरकेशरा रश्मिभिः ॥५८॥
अंगस्य स्मीतरकुहृद्नोद्भृतैः मांकिते ॥ रूपास्यमानं च रणेषु रेणुभिः ॥ रयप्रकर्षाध्ययनार्थमागतैर्जनस्य चेतोरिवा
मारुतैः ॥५८॥ वलावलप्रोथतया महीस्थते स्वयेगदर्पा निवेंकुमुत्सुकं ॥ अलं गिरा वेदकिलायमाशयं स्वयं हयस्येति च मौनमास्थितं ॥६०॥ महा
रथस्याध्वनि चक्रवर्त्तिनः पुरानपेक्षो द्वहनाध्वशाः सितं ॥ रदावदातांशुमिषादनीदृशां हसंतमंतर्बलमर्वतां रवेः ॥६१॥ सितातिवश्चं चलतामु
पेयुषो मिषेण पुच्छस्य च केसरस्य च ॥ स्फुटं चलच्चामरयुग्मचिह्नकैरनिह्नुवानं निजवाजिराजतां ॥६२॥ अपि द्विजिह्वोस्य च हारपौरुषे मुखानु
षक्तायतवल्गुवल्गया ॥ उपेयिवांसं प्रतिमल्लतां रयस्मये जितस्य प्रसभं गरुत्मतः ॥६३॥ स सिंधुजं सीतमहःसहोदरं हरंतमुच्चैःश्रवसः श्रियं
हयं ॥ जिताखिलक्ष्मास्तदनल्पलोचनस्तमारुरोह क्षितिपाकशासनः ॥६४॥ ॥आदिकुलकं॥ ॥ निजामयूखाइतीक्ष्णदीधितिं स्फुरद्विदांकित
पौष्पपंकजं ॥ तमुच्चवाराजवनाम्नया विनं प्रकारारूपामनुजेत्रामन्वयुः ॥६५॥ चलन्नलस्त्यमहारयं हयं सवाहवो होचितवेषपवालः ॥ अमो
द निष्पंदतरा स्थिरस्मितिर्य्यलोकि लोकैर्नगरालयैर्नलः ॥६६॥ क्षणादथैष क्षणदापतिप्रभः प्रजजनाध्येयजवेन वाजिना ॥ सहस्ततासिर्जनदृ
ष्टिर्निर्बहिः पुरोस्य तुरुकृतपौरुषः ॥६७॥ ततः प्रतीच्छ प्रहरेति भाषिणी परस्परोल्लासितशौर्यपल्लवे ॥ मृधामृधं सादिबले कुतूहलान्नलस्य
नासीरगते वितेनतुः ॥६८॥ अयातुमस्माकमियं कियत्पदं धरा तदंभोधिरपि स्थलायतां ॥ इतीव वाहैर्निजवेगदर्पितैः पयोधिरोधक्षममु
द्धतं रजः ॥६९॥ हरे यदक्रामि पदैककेन खं पदैश्चतुर्भिः क्रमणेपि तस्य नः ॥ त्रपा हरीणामिति नम्रिताननैर्व्यवर्त्तितैर्धूर्जनसंहतक्रमैः ॥७०॥
न मृचरास्तस्य नृपस्य सादिनो जिनोक्तिशुश्राद्धतयेव सैंधवाः ॥ विहारदेशं तमवाप्य मंडलीमकारयन्भूरितुरंगमानपि ॥७१॥ द्विष
द्भिरेवास्य विलंघितो दिशो यशोभिरेवाब्धिरकारि गोष्पदं ॥ इतीव धारामवधीर्य मंडलीक्रियाश्रिया मंडितुरंगमैः स्थली ॥७२॥ अथैक
रथ्यारूहयेनया भ्रमी निर्जातपत्रस्य तलस्थले नलः ॥ मरुत्किमघापिनताः सुनिश्चितं वितत्य वात्यामयचक्रचंक्रमान ॥७३॥ निवेश्यागत्य स
विलासकाननं ततः क्षणाल्लोपपतिर्धृतीच्छया ॥ अलंरागमुरितं सुषुप्सया हरिर्घनच्छायमिवांतसांनिधिं ॥७४॥ वनांत मुपेत्य सस्पृ

श्री॰

शल्य७

२ व॰ ज॰

पाले २

हं क्रमेण तास्मिन्नोत्तीर्णदृक्पथे ॥ न्युवर्त्तिदृष्टिप्रकरैः पुरोकसामनुबंधं स्तुसमाजबंधुस्तिः ॥७५॥ ततः प्रसूनेव फलेव वंजुळे समं मुरनखांगुळिमा
नराधिपः ॥ निबंधमानं वनेपाणिनाव्यलोकयत्काननकामनीयकं ॥७६॥ फळानि पुष्पाणि च पल्लवे करे वयोतिपातोद्गतवातवेपिते ॥ स्थितैः समा
दायमहर्षिबाधका घनेतदातिथ्यमशिक्षितास्थितिः ॥७७॥ विनिद्रपत्राळिगताळिकैतवान्मन्मागां कृत्स्नमणिवर्जनार्जितं ॥ दधानमाज्ञामुच रिपु
दुर्यवाः सकौतुकी तत्र ददर्श केतकं ॥७८॥ वियोगभाजां हृदि कूटकैः कृदुर्निधीयसे कूर्णिशास्मरेण यत्र ॥ ततो दुराकूर्षतयात दंतलद्विगीयसे मन्मे
य देहदाहिना ॥७९॥ त्वदंग्यसच्यासचिवेन कामिनो मनो नवश्रीः सीच्यति दुर्यवाः पटो ॥ स्फुटं च पत्रैः कूरपत्रमर्जिर्जितवियोगिहृद्दाकृणिदारूण
यमे ॥८०॥ धनुर्मधुस्त्विन्नकरोपिंजीमजापरं परागैस्तवधूळिहस्तयन् ॥ मसृनधन्वाद्वारसान्करोतिमाभितिदूधाकृत्रपतन्ने न कृतकं ॥८१॥
त्रिजिर्भिन्नोघकं ॥ विदर्भसुभ्रू स्तनतुंगतापत्रये घटानि बापद्रय दळेतपस्यतः ॥ फुल्लानि धूमस्यधयोन धोमुखान्सदाडिमे स्तो हृदधूपिनि कुसुमे ॥८२॥
वियोगिनीमैक्षत दाडिमीमसौ प्रस्नतेस्यषमुदीतकूटकां ॥ फूळस्तनस्थानविदीर्णरागिहृद्विराजुकास्यस्मरविंस्तुकाश्रुगां ॥८३॥ स्मराद्ध

करं १०

चंदेपुनिमेत्रकाकृशीयसां स्फुटे पलाशो घनुषां पळानानात ॥ स्मरंतमालोकृतखंडमेउन्वितं वियोगिहृत्खंडनिकाळखंडजं ॥८४॥ नवालता
गंधवहेनचुंबितां बितांगीमकरंदशीकरैः ॥ दत्वानमेणक्षिमतन्नोन्निकुजळादराहसाभ्यां दरकूपिनीपपे ॥८५॥ विचिन्वतीः पांथपतंगहिंसने स्फुण्य
कूर्माण्याळिकृजाळकळात ॥ व्यलोकयच्चंपककोरकावळीः स तांबराखेर्बळिदीपिकाइव ॥८६॥ अमन्यतासौ कुसुमेषुगर्नेगं परागमेघं करणानि
योगिनां ॥ स्मरेण मुक्तेषु पुरापुनारयेत दंगरस्नेवरनारेषु संगतं ॥८७॥ पिका...रणवति ...गडूलसतैर्दशामुदं च ...वियोगिनां ॥ अनास्थ
यास तु करप्रसारिणी ददर्श हूनः स्फळपाम्भिनीनळं ॥८८॥ रसाळशाळः ... यता मुनास्फुर द्विरेफारवरोषहुंकृतिः ॥ समीरलोलेर्मु
कुळैर्वियोगिने व्यंजनायदित्सान्निवतर्जनाभियं ॥८९॥ दिने दिने त्वं तनुरेधिरेधि कं पुनः पुनर्मूर्छ चुतापमच्चा ॥ इतीवपांथं स्वापतः पिकान्वि
जान्मखेदमैक्षिष्ट स लोहितेक्षणान् ॥९०॥ आकिंत्रमाकुमलमुच्चरोसवरं निपीय पूर्वोपेयमधीरयादृशां ॥ सधूमकेतुं विपदे वियोगिनां मुदीत
मातं कृतवान्न शंकृत ॥९१॥ गळत्परागं भ्रमिसंगिभिः पतत्प्रसक्तमनंगावळिनागके सरं ॥ समारनानाचुनिघर्षणास्खलज्ज्वलत्कृपाणाग्निवा
व्यलोकयत् ॥९२॥ तदंगमुद्दिश्य सुगंधिपातुकाः शिळीमुखाळीः कुसुमायुधस्य रः ॥ स्वचापदुर्निर्गतमार्गणभ्रमात्स्मरः स्वनंतीरवलोक्य लज्जितः ॥

धिया ३

मरुल्लुलत्पूर्वकं रकैः स्रुतं समुच्चरत्... चंदनसारसौरभं॥ सनारनारीकुचवर्संवितापमंदद्रुमिालूरफळं पचेलिमं॥७४॥ युवद्वयी वित्तनिमज्जनोचित
प्रसूनभन्येतरगर्स्तगह्वरं॥ स्मरेषुधीकृत्य धियातियां धयासपाटल्लायास्तावकप्रकंपितः॥७५॥ मुनिद्रुमः कोरकितः शितिद्युतिर्वनेमुनामन्यत सि
ह्निकासुतः॥ तमिस्रपक्षत्रुटिकूटसक्षिणं तंकल्लाकलापंकिल वैधवंवमन्॥७६॥ पुरोहठाह्निमतुषारपांडुरच्छदावृत्तेर्वीरुधि बद्धबुद्धिभिः। अमाः॥ मिल
न्निमीलं सस्तजुर्विलोकिता न सत्वतस्तां कुसुमेषु केळयः॥७७॥ गताय दुत्संगतळेविशाळतां द्रुमात्रिशोत्तिः फळगौरवेणतां॥ कथं नधात्रीमति
मात्रनामितैः सवृंदमानानस्तिनं द्दतिस्मतान्॥७८॥ न्वपाय तसैहिमितं वनानिलैः सुधीकृतं पुष्परसैरहर्महः॥ विनिर्मितं केतकरेणुत्तिः सितं वि
योगिनेदत्तनकौमुदीमुदः॥७९॥ अयोगभाजोपिनृपस्यपश्यतां तेदेवसाहादमतीसुमाननं॥ पिकेन रोषारुणचक्षुषामुद्धः कुहूरुताहूयत
वंगवैरिणी॥१००॥ अशोकमर्थान्वितनामताशयागतान् शरण्यं गृहशोविनोद्धगान्॥ अमन्यथावंतमिवैषपल्लवैः प्रतीच्छकामज्वलदस्त्रजा
लकं॥१॥ विलासवापीतटवीचिवादनात्पिकालिगीतेः शिखिलास्यलाघवात्॥ वनेपितोर्यत्रिकमारराधतं क्वसोगमाप्रीतिनसाम्यसाजनः॥
तदर्थमध्यापयजनेनतद्वनेशुकाविम... परवस्तामरूफवन्॥ स्वराम तेनोपजगुस्ससारिकास्तथैवतत्पौरुषगायनीकृताः॥३॥ इतीष्टगंधाढ्य
मटन्नसौवनं पिकोपगीतोपिशुकस्तुतोपिच॥ अविंदतामोदसरं बहिश्चरं विदर्भसुभ्रूविरहेणनांतरं॥४॥ करेणमीनं निजकेतनं दधत् कु
माळवालांबुनिवेशशंकया॥ व्यतार्किसर्वर्तुघनेवनेमधुं सभित्रमत्रानुसरन्निवस्मरः॥५॥ लतावलाल्लेस्यकलागुरुस्तारुपसूनगंधोच्च
रपत्रयतोहरः॥ असेवतामुं मधुगंधवारिणिप्रणीतलीलाप्लुवनोवनानिलः॥६॥ अथस्वमाशयलयेनमंथनाश्चिरलरत्नाधिकमुच्छितं दिशात
निलीयतस्मिन्निवसन्नपां निधिर्वनेतडागोदहलोवनीभुजा॥७॥ पयोनिलीनाभ्रमुकामुकावलीरदाननंतोरगपुंकसुख्रवीन्॥ जलाद्
रूढस्यतरातस्सिदोमणालजालस्यमिषा... रयः॥८॥ तटांतविश्रांततुरंगमच्छटास्फुरानुबिंबोदयचुंबनेनयः॥ बलौवलक्षीत्विकचांत
शातनैः सहस्रमुच्चैः श्रवसामिवाश्रयन्॥९॥ सितांबुजानांनिवहस्यययच्छलादृसावलिश्यामलितोदरश्रियां॥ तमः समच्छायकलंकसं
संकुलं कुळं सुधांशोर्बकुलं वहन्नबकु॥१०॥ रथांगसाजाकमलानुषंगिणाश्रिलीमुखस्तोमसखेनत्राडिंणा॥ सरोजिनीस्तंबकदंबकेतवा

7

।१

न्मणाळ्ळशोषाहिस्तुवान्चयायियः॥११॥तरंगिणीरंकजुषस्त्वचल्लुसास्तरंगलेखाबिसरांछस्रुवयः॥दरोन्नतैः कोकनदौघकोरकैर्धृतप्रवाळांकुरसंचय
श्चयः॥१२॥महीयसः पंकजमंडळस्य यश्छळेन गौरस्य च मेचकस्य च॥नळेन मेने सलिले निलीनयोस्त्विषं विमुंचन्न विधुकाळकूटयोः॥१३॥
वलीसता यत्र तरंगरिंगणैरबाळशैवाललतापरंपराः॥ध्रुवं दधुर्वाडवहव्यवाडवस्थितिप्ररोहत्तमसूमधूमतां॥१४॥प्रकाममादित्यमवाप्य
कंटकैः करंबितामोदभरं विहृण्वती॥धृतस्फुटश्रीगृहविग्रहा दिवासरोजिनी यत्प्रसवाप्सरायिता॥१५॥यदंबुपूरप्रतिबिंबितायतिर्मरुत्त
रंगैस्तरळस्तटद्रुमः॥निमज्य मैनाकमहीस्ततः सुतस्ततान पक्षान्धुवतः सपक्षतां॥१६॥पयोधिलक्ष्मीमुषि केळिपल्वले रिरंसुहंसीकळ
त५ नादसादरं॥स तत्र चित्रं विचरंतमंतिके हिरण्मयं हंसमबोधि नैषधः॥१७॥प्रियासु बाळासु रतक्षमासु च द्विपत्रितं पल्लवितं च बिभ्रतं॥स्म बि
राजितं रागमहीरुहांकुरं मिषेण वंचोश्चरणद्वयस्य च॥१८॥महीमहेन्द्रस्तमवेक्ष्य सक्षणं शकुंतमेकांतमनोविनोदिनं॥प्रियावियो
गाद्विधुरोपि निर्भरं कुतूहलाक्रांतमना मनागभूत॥१९॥अवश्यभव्येष्वनवग्रहग्रहा यया दिशा धावति वेधसः स्पृहा॥तृणेन वात्येव त
यानुगम्यते जनस्य चित्तेन भृशावशात्मना॥२०॥अथावलंब्य क्षणमेकपादिकां तदा निदद्रावुपपल्वलं खगः॥स तिर्यगावर्जितकंधरः शि
रः पिधाय पक्षेण रतक्लमाळसः॥२१॥सनाळमात्माननिर्जितप्रसंक्रियानतं कांचनमंबुजन्म किं॥अबुद्धतं विद्रुमदंडमंडितं स पीतमंभः
प्रभुचामरं च किं॥२२॥कृतावरोहस्य हयादुपानहौ ततः पदे रेजतुरस्य बिभ्रती॥तयोः प्रवाळैर्वनयोस्तथांबुजैर्नियोद्धुकामे किमुब
पं४ द्धवर्मणी॥२३॥विधाय मूर्तिं कपटेन वामनीं स्वयं बलिध्वंसिविडंबिनीमयं॥उपेतपार्श्वश्चरणेन मौनिना नृपः पतंगं समधत्त पाणि
ना॥२४॥तदात्तमात्मानमवेत्य संभ्रमात्पुनः पुनः प्रायसदुत्प्लवाय सः॥गतो विरुत्योड्डयने निराशतां करौ निरोद्धुर्दशति स्म केवलं॥२५॥
ससंभ्रमोत्पातिपतत्कुलाकुळं सरः प्रपद्योत्कतयानुकंपितां॥तमूर्मिलोलैः पतगग्रहान्नृपं न्यवारयद्वारिरुहैः करैरिव॥२६॥पतत्रि
णा तद्रुचिरेण वंचितं श्रियः प्रयांत्याः प्रविहाय पल्वलं॥चलत्पदांभोरुहनूपुरोपमा चुकूज कूले कलहंससमंडली॥२७॥न वासयोग्या
वसुधेयमीदृशस्त्वमंग यस्याः पतिरुज्झितस्थितिः॥इति प्रहाय क्षितिमाश्रिता नभः खगास्तमाचुक्रुशुरारवैः खलु॥२८॥न जातरूपच्छ ॥५॥

द्दजातरूपतातिद्विजस्य दृष्टेयमिति स्तुवन्मुहुः॥ अवादि तेनाथ समानसौकसा जनाधिनाथः करपंजरस्पृशा॥२९॥ धिगस्तु तृष्णातरलं
भवन्मनः समीक्ष्य पक्षान्मम हेमजन्मनः॥ तवार्णवस्येव तुषारशीकरैर्भवेदमीभिः कमलोदयः कियान्॥३०॥ न केवलं प्राणिवधो वधो मम
त्वदीक्षणाद्विश्वसितांतरात्मनः॥ विगर्हितं धर्मधनैर्निबर्हणं विशिष्य विश्वासजुषां द्विषामपि॥३१॥ पदे पदे संति भटा रणोद्भटा न तेषु हिंसार
स एष पूर्यते॥ धिगीदृशं ते नृपते कुविक्रमं कृपाश्रये यः कृपणे पतत्त्रिणि॥३२॥ फलेन मूलेन च वारिभूरुहां मुनेरिवेत्थं मम यस्य वृत्तयः॥ त्व
याद्य तस्मिन्नपि दंडधारिणा कथं न पत्या धरणी हृणीयते॥३३॥ इतीदृशैस्तं विरचय्य वाङ्मयैः सचित्रवैलक्ष्यकृपं नृपं खगः॥ दयासमुद्रे स
तदाशये तिथीचकार कारुण्यरसापगा गिरः॥३४॥ मदेकपुत्रा जननी जरातुरा नवप्रसूतिर्वरटा तपस्विनी॥ गतिस्तयोरेष जनस्तमर्दयन्नहो विधे त्वां
करुणा रुणद्धि नो॥ मुहूर्तमात्रं भवनिंदया दयासखाः सखायः स्रवदश्रवो मम॥ निवृत्तिमेष्यंति परं दुरुत्तरस्त्वयैव मातः सुतशोकसागरः॥३६॥ म
दर्थसंदेशमृणालमंथरः प्रियः कियद्दूर इति त्वयोदिते॥ विलोकयंत्या रुदतोऽथ पक्षिणः प्रिये स कीदृग्भविता तव क्षणः॥३७॥ कथं विधातर्म
यि पाणिपंकजात्तव प्रियाशैत्यमृदुत्वशिल्पिनः॥ वियोक्ष्यसे वल्लभयेति निर्गता लिपिर्ललाटंतपनिष्ठुराक्षरा॥३८॥ अयि स्वयूथ्यैरशनिक्षतोपमं
ममाद्य वृत्तांतमिमं बतोदिता॥ मुखानि लोलाक्षि दिशामसंशयं दशापि शून्यानि विलोकयिष्यसि॥३९॥ ममैव शोकेन विदीर्णवक्षसा त्वयापि
चित्रांगि विपद्यते यदि॥ तदास्मि दैवेन हतोऽपि हा हतः स्फुटं यतस्ते शिशवः परासवः॥४०॥ तवापि हा हा विरहात्क्षुधाकुलाः कुलायकूलेषु वि
लुठ्य तेषु ते॥ चिरेण लब्धा बहुभिर्मनोरथैर्गताः क्षणेनास्फुटितेक्षणा मम॥४१॥ सुताः कमाहूय चिराय चूंकृतैर्विधाय कंप्राणि मुखानि कं प्र
ति॥ कथासु शि[illegible]ध्वमिति प्रमील्य सः स्रुतस्य सेका बुबुधे नृपाश्रुणः॥४२॥ इत्थममुं विलपंतममुंचद्दीनदयालुतयावनिपालः॥ रूप
मदर्शि धृतोसि यदर्थं गच्छ यथेच्छमथेत्यभिधाय॥४३॥ आनंदजाश्रुभिरनुस्रियमाणमार्गान्प्राक्शोकनिर्गमितनेत्रपयःप्रवाहान्॥ चक्रे स
चक्रनिभचंक्रमणछलेन नीराजनां जनयतां निजबांधवानां॥४४॥ ॥ श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं श्रीहीरः सुषुवे जि
तेंद्रियचयं मामल्लदेवी च यं॥ तच्चिंतामणिमंत्रचिंतनफले शृंगाररसंगया महाकाव्ये चारुणि नैषधीयचरिते सर्गोयमादिर्गतः॥१॥ ॥ अधिगत्य
जगत्यधीश्वरादथ मुक्तिं पुरुषोत्तमात्ततः॥ वचसामपि गोचरो न यः स तमानंदमविंदत द्विजः॥१॥ अधुनीत खगः स नैकधा तनुमुत्फुल्लतनूरु

हीक्षणां॥ करयंत्रणदंतुरांतरे व्यलिखच्चंचुपुटेन पक्षती॥२॥ अयमेकतमेन पक्षतेरधिमध्योर्ध्वगजंघमंघ्रिणा॥ स्वपलैः क्षण एव चिक्षिये धुतकंडूयि
तमिनमौलिकिराळयं॥३॥ स गरुद्वनदुर्गदुर्ग्रहान्कटुकीटान्द्रातःसतः कविः॥ नुनुदे तनुकंडु पंडितः पटुचंचूपुटकोटिकुट्टनैः॥४॥ अयमत्यतडाग
नीडजैर्लघु पर्यव्रियताथ शंकितैः॥ उदडीयत नैकतालकः करग्रहजादस्य विकस्वरस्वरैः॥५॥ वहतो बकुलावलक्ष्मतां धृतरुग्मासमधुव्रतैः खगः॥ सन
ळस्य करं ययौ पुनः सरसः कोकनदभ्रमादिव॥६॥ पतगश्चिरकाललालनादतिविश्रंसमवापितो नु सः॥ अतुलं विदधे कुतूहलं भुजमेतस्य स
जन्महीभुजः॥७॥ नृपमानसमिष्टमानसः स निमज्जत्कुतुकामृतोर्मिषु॥ अवलंबितकर्णशष्कुलीकलशीकं रचयन्नवोचत॥८॥ मृगयान
विगीर्यते न्यपेरविधर्मागममर्मपारगैः॥ स्मरसुंदरमां यदत्यजस्तव धर्मः सदयोदयोज्वलः॥९॥ अवलस्वकुलाशिनो झषान्निजनीडद्रुमपी
डिनः खगान्॥ अनवद्यतृणार्दिनो मृगान्मृगयाघाय न भूभुजां घ्नतां॥१०॥ यदवादिषमप्रियं तव [illegible] प्रियमाधाय नु तुष्यतातत॥ कृतमात
पसंज्वरं तरोरभिवृष्यामृतमंशुमानिव॥११॥ उपनम्रमयाचितं हितं परिहर्तुं न तवापि सांप्रतं॥ करकल्पजनांतराद्विधेः शुचितः प्राप्तिमहि
प्रतिग्रहः॥१२॥ ~~स विता न विचारवान्स्तवे तदपि व्यमिदं मदीरितं॥ स्वममानं निमिमत्यतोपि किं न च स्यास्यति कीरमीरिव~~॥ पतगेन मयाजग
त्पतेरुपकृत्ये तव किं प्रसूयते॥ इति वेद्मि न तु त्यजंति मां तदपि प्रत्युपकर्तुमर्तयः॥१३॥ अचिरादुपकर्तुराचरेदथवात्मौपयिकीमुपक्रियां॥ पृथुरि
त्थमथाणुरस्तु सा न विशेषे विदुषामिहाग्रहः॥१४॥ स विता न विचारवान्स्तवे तदपि व्यमिदं मदीरितं॥ खगवागियमित्यतोपि किं न मुदं धास्यति
कीरगीरिव॥१५॥ स जयत्यरिसार्थसार्थकीकृतनामा किल भीमभूपतिः॥ यमवाप्य [illegible] विदर्भभूः प्रभुं हसति द्यामपि शक्रभर्तृकां॥१६॥ द
मनादमनाक्प्रसेदुषस्तनयां तथ्यगिरस्तपोधनात्॥ वरमाप स दिष्टविष्टपत्रितयानन्यसदृग्गुणोदयां॥१७॥ भुवनत्रयसुभ्रुवामसौ दमयं
तीकमनीयतामदं॥ उदियाय यतस्तनुश्रियादमयंतीति ततोभिधां दधौ॥१८॥ श्रियमेव परं धराधिपाद्गुणसिंधोरुदितामवेहितां॥ [illegible]यथा
वपि वाविधोः कलिकामद्य रूढ निलयां न वेदकः॥१९॥ चिकुरप्रकरा जयंति ते विदुषीमूर्द्ध्नि स या बिभर्ति यान्॥ पशुनाप्यपुरस्कृतेन तत्तुलनामिच्छतु
चामरेण कः॥२०॥ स्वदृशोर्जनयंति सांत्वनां खुरकंडूयनकैतवान्मृगाः॥ जितयोरुदयत्प्रमीलयोस्तदखर्वेक्षणशोभया भयात्॥२१॥ अपि लोक
युगं दृशावपि श्रुतदृष्टा रमणीगुणा अपि॥ श्रुतिगामितया दमस्वसुर्व्यतिभाते सुतरां धरापते॥२२॥ न लिनं मलिनं विवृण्वती [illegible] पृषतीमस्पृशती तदीत

स्म

॥५

वि॰

दीक्षणे॥ अपि खंजनमंजनांचिते विदधाते रुचिगर्वदुर्विधं॥२३॥ अधरं किल बिंबनामकं फलमस्मादिति सत्यमन्वयं॥ लभते धरबिंबमित्यदः पदमस्या
रदनच्छदं वदत्॥२४॥ हृतसारमिवेंदुमंडलं दमयंतीवदनाय वेधसा॥ कृतमध्यबिलं विलोक्यते धृतगंभीरखनीखनीलिम॥२५॥ धृतलांछनगो
मयांचितं विधुमालेपनपांडुरं विधिः॥ भ्रमयस्फुरितं विदर्भजाननमीराजनवर्धमानकं॥२६॥ सुषमाविषये परीक्षणे निखिलं पद्ममभोजि तन्मु
खात्॥ अधुनापि न भंगलक्षणं सलिलोन्मज्जनमुज्झति स्फुटं॥२७॥ धनुषी रतिपंचबाणयोरुदिते विश्वजयाय तद्भ्रुवौ॥ नलिके न तदुच्चना
सिके त्वयि नालीकविमुक्तिकामयोः॥२८॥ सदृशी तव शूर सा परं जलदुर्गस्थमृणालजिद्भुजा॥ अपि मित्रजुषां सरोरुहां गृहयालुः करलील
या श्रियः॥२९॥ वयसी शिशुतातदुत्तरे सुदृशि स्वाभिविधिं विधित्सुनी॥ विधिनापि न रोमरेखया कृतसीमे प्रविभज्य रज्यतः॥३०॥ अपि तद्वपुषि
प्रसर्पतोर्गमिते कांतिझरैरगाधतां॥ स्मरयौवनयोः खलु द्वयोः प्लवकुंभौ भवतः कुचावुभौ॥३१॥ कलशे निजहेतुदंडजः किमु चक्रभ्रमिकारिता
गुणः॥ स तदुच्चकुचौ भवन्नभूत्सा सरचक्रभ्रमिमातनोति यत्॥३२॥ सजतो स्वलु षण्मुखं त्रिशूली विकुरे निर्मितबर्हगर्हणैः॥ अपि जंभरिपुं दमस्वसुर्जि
तकुंभः कुचयोः स्तयेत्सराट्॥३३॥ उदरं नतमध्यपृष्ठतास्फुरदंगुष्ठपदेन मुष्टिना॥ चतुरंगुलिमध्यनिर्गतत्रिवलिर्भाति दमस्वसुः॥३४॥ उद
रं परिमातिमुष्टिना कुतुकी कोपि दमस्वसुः किल॥ धृतत्र्यंगुलिरंगुलीवयद्वलिभिः सातिलहेमकांचिभिः॥३५॥ पृथुवर्तुलतान्नितंबकृन्मिहिरस्यं
दनाद्रिलयात्रिलक्षया॥ विधिरेककचक्रचारिणं किमु निर्मित्सति मान्मथं रथं॥३६॥ तरुमूरुयुगेन सुंदरी किमु रंभां परिणाहिना परं॥ तरुणीमपि जि
ष्णुरेव तां धनदापत्यतपःफलस्तनी॥३७॥ जलजे रविसेवयेव ये पदमेतत्पदतामवापतुः॥ ध्रुवमेत्य रुतः सहंसकी कुरुतस्ते विधिपत्रदंपती॥३८॥
श्रितपुण्यसरः सरित्कथं न समाधिक्षपिताखिलक्षपं॥ जलजं गतिमेतु मंजुलां दमयंतीपदनाम्नि जन्मनि॥३९॥ सरसीः परिशीलितुं मया गा
मिकर्मीकृतनैकनीवृता॥ अतिथित्वमनायि सा दृशोः सदसत्संशयगोचरोदरी॥४०॥ अवधृत्य दिवोपि यौवतैर्न सहाधीतवतीमिमामहं॥
कतमस्तु विधातुराशये पतिरस्या वसतीत्यचिंतयं॥४१॥ अनुरूपमिमं निरूपयन्नथ सर्वेष्वपि पूर्वपक्षतां॥ युवसु व्यपनेतुमक्षमस्त्वयि
सिद्धांतधियं न्यवेशयं॥४२॥ अनया तव रूपसीमया कृतसंस्कारविबोधनस्य मे॥ चिरमप्यवलोकिताद्य सा स्मृतिमारूढवती भु
वि स्मिता॥४३॥ त्वयि वीर विराजते परं दमयंती किलकिंचितं किल॥ तरुणीस्तन एव दीप्यते मणिहारावलिरामणीयकं॥४४॥ तव रूपमि

रंतया विना विफलं पुष्यमिवावकेशिनः ॥ इयमकृधनाद्यथावनीस्त्वनवनीसंभवदृत्तिकाधिका ॥४५॥ अनयासुरकाम्यमानया सहयोगः सुल
भस्तु न त्वया ॥ घनसंवृतयांबुदागमे कुमुदेनेव निशाकरत्विषा ॥४६॥ तदहं विदधे तथा तथा दमयंत्याः सविधे तव स्तवं ॥ हृदये निहितस्तया भ
वान्नपि नेंद्रेण यथापनीयते ॥४७॥ तव संमतिमेव वक्तुमभ्यधिगंतुं धिगिदं निवेदितं ॥ ब्रुवते हि फलेन साधवो न तु कंठेन निजोपयोगितां ॥४८॥
तदिदं विशदं वचोमृतं परिपीयाभ्युदितं द्विजाधिपात् ॥ अतितृप्ततया विनिर्ममे स तदुद्गारमिव स्मितं सितं ॥४९॥ परिमृज्य भुजाग्रजन्मना प
तगं कोकनदेन नैषधः ॥ मृदु तस्य मुदे विरजिरः प्रियावादामृतकूपकंठजाः ॥५०॥ न तुला विषये तवाकृतिर्न वचो वर्त्मनि ते सुशीलता ॥ त्व
दुदाहरणाकृतौ गुणा इति सामुद्रिकसारमुद्रणा ॥५१॥ न सुवर्णमयी तनुः परं ननु किं वागपि तावकी तथा ॥ न परं पथि पक्षपातिता ऽनवलंबे विमु
मादृशेपि सा ॥५२॥ भ्रमता तापभृतामयान्न वान्मरुता सादितुषारसारवान् ॥ धुनिनामितरः स तां पुनर्गुणवत्सन्निधिरेव सन्निधिः ॥५३॥ त्रा
तशः श्रुतिमागते वसा त्रिजगन्मोहमहौषधी मम ॥ अमुना तव वंशसिते ननु स्व दृशौ वाधिगतामवेमि तां ॥५४॥ अखिलं विदुषामनाविलं सुहृदा च
स्वहृदा च परस्य तत् ॥ स विधेपि न सूक्ष्मसाक्षिणी वदनालंकृतिमात्रमक्षिणी ॥५५॥ अमितं मधु तत्कथा मम श्रवणप्राघुणिकीकृता जनैः ॥ मदना
नल[illegible]धनेनवृत्तवगाधाव्याधिगधैर्यधारिणः ॥५६॥ विषमो मलयाहिमंडली विषफूत्कारमयो मयोहितः ॥ खगकालकूटजदिनभवः पव
नस्त्वधिरहानलैधसां ॥५७॥ प्रतिमासमसौ निशापतिः खगसंगच्छति यद्दिनाधिपं ॥ किमु तीव्रतरैस्ततः करैर्मम दाहाय स धैर्यतस्करैः ॥५८॥
कुसुमानि यदि स्मरेषवो न तु वज्रं विषवह्निजानि तत् ॥ हृदयं यदमूमुहन्न मे मम यच्चातितरामतीतपन् ॥५९॥ तदिहानवधौ निमज्जतो मम कं
दर्पशराराधिनीरधौ ॥ भवपोत इवावलंबनं विधिनाकस्मिकसृष्टसंनिधिः ॥६०॥ अपथागवतः स्मवर्त्तनानकूथंपि चमियंपि न चिनः ॥ स्वत एव स
तां परार्थता ग्रहणानां हि यथा यथार्थता ॥६१॥ तव वर्त्म निवर्त्ततां शिवं पुनरस्तु त्वरितं समागमः ॥ अयि साधय साधयेप्सितं स्मरणीयाः समये
वयं वयः ॥६२॥ इति सो फाविसृज्यतं खगं नपतिः स न तवाग्बृहस्पतिः ॥ अविशाद्भवनेभमविस्मितः स्मतिलस्तैः कुलहंसशासितैः ॥६३॥ अथ भी
मसुतावलोकनैः सफलं कर्तुमहस्तदेव सः ॥ क्षितिमंडलमंडनायितं नगरं कुंडिननामजोययौ ॥६४॥ प्रथमं पथि लोचनोतिथिं पथिकप्रार्थित
सिद्धिशासनं ॥ कुलराजलसंस्पृतं पुरः कुलहंसः कलयांचकार सः ॥६५॥ अवलंब्य दिदृक्षयांबरे क्षणमाश्चर्यरसालसंगतं ॥ स विलासवनेवनी

बो

राम

॥६॥

न्तः फलमैक्षिष्ट रसालसंगतं ॥६६॥ न ससः कलसेरुपासितं जलदैस्तुरितरत्नपंनगां ॥ सरदद्रपतंगपुंगवो विटपच्छन्नतरत्नपंनगं ॥६७॥
सययोधुतपक्षतिः क्षणं क्षणमूर्ध्वायनदुर्वि[illegible]भावनः ॥ विततीकृतनिश्चलच्छदः क्षणमालोककरत्नकौतुकः ॥६८॥ तनुदीधितिधारयारयाऽ
तयालोकविलोकनाम सौ ॥ छद हेमकषन्निवालसत्कषपाषाणनिसेन सत्ताले ॥६९॥ विनमद्भिरधः स्थितैः खगैर्स्तटिति श्येननिपात
तांकि[illegible]सिः ॥ स निरीक्षितदृशौकयोपरिस्यदसांकारितपत्रपक्षतिः ॥७०॥ ददृशेनजनेन यन्न सौत्सुवितच्छायमवेक्ष्यतत्क्षणात् ॥ दिविदि
क्षु वितीर्णवत्सुपापत्युवेगद्रुतमुक्तदप्यथः ॥७१॥ नवनं पथि त्रित्रियेमुनाकविदष्णु ब्रतरद्रुवारुतं ॥ नसगोत्रजमन्वबोदिवागतिवेगम्र
सरद्रुवारुतं ॥७२॥ अथ सोमनृपेणपालिता नगरीमंजुरसौधराजिता ॥ पतगस्य जगाम दृक्पथं हरशैलोपमसौधराजिता ॥७३॥ दयि
तं प्रति यत्र संततारतिहासो[illegible]वरे जिरेत्सुवः ॥ स्फटिकोपलविग्रहा गृहाः सा त्रास्तु द्वित निरंकस्तित्रयः ॥७४॥ नृपनीलमणिगृहत्विषामुप
धेर्यत्र सयेन सास्वतः ॥ त्वारणार्थमुवास वासरेप्यसदाहस्कृदयत्रामतेमः ॥७५॥ सितदीप्तमणिप्रकल्पितेयदगारेहसदंकरोधसि ॥ निखिलान्नि
शीथपूर्णिमातिथीनुपतस्थेतिथिरेकिकातिथिः ॥७६॥ सुदतीजनम[illegible]जनार्पितैर्घुसृणैर्यत्र कषायिताशया ॥ नुनिद्राखिलयापिवापिका
त्रससादग्रहिलेवमानिनी ॥७७॥ सणांनीरवयायया नित्रिश्रितावजावलियोगपद्दया ॥ मणिवेश्ममयं स्म निर्मलं किमपि ज्योतिरवाप्यमि
ष्यते ॥७८॥ विलसज्जलत्रायोदरेकच्चनघोरनुबिंबितेवया ॥ परिखाकपटस्फुटस्फुरत्प्रतिबिंबानवलंबितांबुनि ॥७९॥ भुजते दि
वियकूहावलीवल्लवेलांवल्लदंडताडनाः ॥ व्यतरन्नरुणायविभ्रमं सजते हे लिहयालिचालनां ॥८०॥ क्षितिगर्तघसंबरालवैसत्कम
ध्मोपरिपूरिणां पृथक् ॥ जगतां खलु या खिलाद्भुता जनिसारे[illegible]विकृधारि[illegible]दधत्सुंदनीलकंठतां बहुदत्यच्छसुधोज्वलेवपुः ॥
कथमद्भुतनाम यत्र न क्षितितत्त्वमंदिरमिंदुमौलिकता ॥८२॥ बालिसप्रदिवंसतध्यवागुपरिस्माद्दिवोपिनारदः ॥ अधरायकृतायये
सा विपरीताजनितत्वविरूपया ॥८३॥ बहुरूपकशालसंजिकामुरलवंशेषु कलंकरंकवः ॥ यदनेककसौधकंदराहरिसिंहक्षिगती
लताइव ॥८४॥ प्रतिहट्टपथे घरदज्ञात्पधिकाकानदसत्कसौरसे ॥ कलहान्नघनान्यदुस्थिता द्युनाप्युत्सतिघर्घरस्वरः ॥८५॥ वरणाः

३८

13

सर्ग २
८॥

कनकस्यमानिनी दिवमंकादमराद्रिरागता॥ घनरत्नकपाटपक्षतिः पाररस्यानुनयालुवासया॥८६॥ अनलैः परिवेषमेत्य याज्वलदर्कोपलवप्रजन्म
भिः॥ उदयं लयमंतरा रवेरवहन्माणपुरीपरार्ध्यतां॥८७॥ बडकंबुमणिर्वराटिकागणनाटत्करकर्करीकरः॥ हिमवालुकयाच्छवालुकः पटु दु
ध्वान यदापणार्णवः॥८८॥ यदगारघटाट्टकुट्टिमस्रवदिंदूपलतुंदिलापया॥ मुमुचे न पतिव्रतोचितिं तिवंशोदयमस्वगंगया॥८९॥ रुचयो
ऽस्तमितस्य भास्वतः स्खलिता यत्र निरालयाः खलु॥ अपि सायमसुर्विलेपनापणकश्मीरजपण्यवीथयः॥९०॥ विततं वणिजापणे
निखिलं पणितुं यत्र जनेन वीक्षिते॥ मुनिनेव मृकंडुसूनुना जगतीवस्तु पुरोदरे हरेः॥९१॥ समभूमिपणमदैर्यदापणे तुलयन्सोरसलोमनिश्च
ळं॥ पणितानजनारवैरवैदपि गुंजतमलिंमलीमसं॥९२॥ रविकांतमयेन सेतुना सकलाहज्वलनाहितोष्मणा॥ शिशिरे निशि गच्छतां पुरा
चरणौ यत्र दुनोति नो हिमं॥९३॥ विधुदीधितिजेन यत्पथं पयसा नैषधशीलशीतळं॥ शशिकांतमयं तपागमे कलितीव्रातपतिस्मनातपः॥
॥९४॥ परिखावलयच्छलेन या न परेषां ग्रहणस्य गोचरः॥ फणिभाषितभाष्यपंक्तिका विषमा कुंडलनाम वापिता॥९५॥ मुखपाणिपदाक्षि
पंकजै रचितांगेष्वपरेषु चंपकैः॥ स्वयमादित यत्र भीमजा स्मरपूजाकुसुमस्रजः श्रियं॥९६॥ जघनस्तनभारगौरवाद्वियदालंब्य विहर्तुमक्ष
माः॥ ध्रुवमप्सरसोऽवतीर्य यां शतमध्यासत तत्सखीजनः॥९७॥ स्थितिशालिसमस्तवर्णतां न कथं चित्रमयी बिभर्तु या॥ स्वरसेन मुपैतु या
कथं कलितानल्पमुखारवा नवा॥९८॥ स्वरुचारुणया पताकया दिनभर्तुर्यासमीयुषो रथः॥ लिलिहुरूर्ध्वऊधासु धाकरं निशि शोणमणि क्वम
या यदालयाः॥९९॥ लिलिहे स्वरुचा पताकया निशि जिह्वानिभया सुधाकरं॥ स्थितमर्ककरैः पिपासुयन्नपसम्भामळपभरागजं॥१००॥
अमृतद्युतिलक्ष्मपीतया मिलितं यद्बहलसीपताकया॥ बलयायितरोषभाषिनः सवितामादितपीतवाससः॥१०१॥ अ आंतकृतिपाठपूतरस
ना विसृततस्कूरिस्तवाजिसब्रह्मुखोघविघ्नितनवस्वर्गक्रियाकेलिना॥ पूर्वं गाधिसुतेन सामिघटिता मुक्ता नु मंदाकिनी यत्प्रासाददुकूलवल्लिर
निलांदोलैरखेलद्दिवि॥१०२॥ यदतिविमलनीलवेश्मरश्मिभ्रमरितभाः शुचिसौधवस्त्रवल्लिः॥ अलसत्तरामनास्वसुः त्रिभुवं दिवसकरांक
तलेबलात्सुहंती॥१०३॥ स्वप्राणेश्वरनर्महर्म्यकटकातिथ्यग्रहायोत्सुकं पाथोदं निजकेलिसौधशिखरादारुह्य यत्कामिनी॥ साक्षादप्सरसो विमा
नकलित[illegible]व्योमाएवासवयन्प्राप्य निमेषमक्षरसायां तीरसादध्वनि॥१०४॥ वेदर्भीकेलिशैले मरकतशिखरादुच्छितैरंशुदर्भैर्ब्रह्मांडाघा

८

न०

तत्सगनस्य दृजमदतयाश्रीघ्रतावाञ्छुरवलैः॥कस्यानोतानगायादिविसुरसुरसेरास्यदेत्रांगताग्रैर्यज्ञोग्रासप्रदानव्रतसुकृतमविश्रांतमज्जसतेस्म॥१०५
विधुकरपरिरंसादात्मनिष्यंदपूर्णैःशशिदृषदुपक्लृप्तैरालवालैस्तरूणां॥विफलितजलसेकप्रक्रियागौरवेणव्यरचिसहतचित्तत्रसैमीवनेन॥१०६॥अथ
कनकपतत्रस्तत्रतांराजपुत्रीसदसिसदशासाद्यसांविस्फुरंतीसखीनां॥उडुपरिषदिमध्यस्थायिनीतांमृगांकस्वानुकरणपटुलक्ष्मीमक्षिलक्ष्मीचकार॥१०७॥अ
मणरयविवर्णस्वर्णसासाखगोनक्कवनपतनयोग्यंदेशमन्विष्यतास्थः॥मुखविधुमदसीयंसेवितुंलंबमानःशशिनइवपरिधिस्त्रीबोधनिमंडलस्तेनतेने॥१०८॥अ
नुसवतिशबीत्यंसाध्यताबीमुखाश्लिर्नसिहसहवरीत्तिर्नंदनानंदमुच्चैः॥इतिमतिरुदयासीत्पक्षिणःप्रेक्ष्यसैमीविपिनभुविसखीभिःसार्द्धमाबद्धरवेलां॥१०९॥
॥ ॥श्रीहर्षंकविराजराजिमुकुटालंकारहीरःसुतंश्रीहीरःसुषुवेजितेंद्रियचयंमामल्लदेवीचयं॥द्वैतीयीकतयामितोयमगमत्तस्यप्रबंधेमहाकाव्येचारुणि
नैषधीयचरितेसर्गोनिसर्गोज्ज्वलः॥२॥ ॥आकुंचिताभ्यामथपक्षतिभ्यांनभोविभागात्तरसावतीर्य॥निवेशदेशाततधूतपक्षःपपातभूमावुपभैमिहं
सः॥१॥आकस्मिकःपक्षपुटाहतायाःक्षितेस्तदायःस्वनउच्चचार॥द्रागन्यविन्यस्तदृशःसतस्याःसंभ्रांतमंतःकरणंचकार॥२॥नेत्राणिवैदर्भसुतासखीनां
विमुक्ततत्तद्विषयग्रहाणि॥प्रापुस्तमेकंनिरुपाख्यरूपंब्रह्मेवचेतांसियतव्रतानां॥३॥हंसंतनौसन्निहितंचरंतंमुनेर्मनोवृत्तिरिवस्विकायां॥ग्रहीतुका
मादरिणाशयेनयत्नादसौनिश्चलतांजगाहे॥४॥तामिंगितैरप्यनुमायमायामयंनभैम्याविययेऽप्यपात॥तत्पाणिमात्मोपरिपातुकंतुमोघंवितेनेप्लुतिलाघवेन
॥५॥व्यर्थीकृतंपत्ररथेनतेनतथावसायव्यवसायमस्याः॥परस्परामर्पितहस्ततालंतत्कालमालीभिरहस्यतालं॥६॥धृतालपकोपाहसितेसखीनांछाया
वसास्यंतमभिप्रयातुं॥श्यामाथहंसस्यकरानवाप्तेर्मंदाक्षलक्ष्यालगतिसमपश्चात्॥७॥उच्चाटनीयःकरतालिकानांदानादिदानींभवतीभिरेषः॥यान्वे
तिमांद्रुह्यतिमह्यमेवसात्रेत्युपालंभितयालिवर्गः॥८॥राज्ञा[illegible]सिमुखीपुनस्तेयात्रेतिताक्तिम्ब्लहस्यमाना॥साहस्मनैवाशकुनीभवेत्मेसा[illegible]
प्रियावेदकएषहंसः॥९॥हंसोप्यसोहंसगतेःसुदत्याःपुरःपुरश्चारुचलन्नवासे॥वैलक्ष्यहेतोर्गतिमेतदीयामग्रेऽनुकृत्योपहसन्निवोच्चैः॥१०॥प
परेसाविनिसाविनीतंयथाकरप्राप्यमवैतिनूनं॥तथासखेवंचलताल्लतासुप्रतार्यतेनावहृषेकृशांगी॥११॥रूपानिविडाल्लिजनांयदेनांछाया
द्वितीयांकलयांचकार॥तदाश्रमांभःकणभूषितांगीमकीरवन्मानुषवागवादीत्॥१२॥अयेकियद्यावदुपैषिदूरंव्यर्थंपरिश्राम्यसिवाकिमर्थं॥
उदेतितेभीरपिकिंनुबालेविलोकयंत्यानघनावनाली॥१३॥हर्षात्पर्ययंतीमपथेपदंत्वांमरुल्ललत्पल्लवपाणि[illegible]॥सखीवपक्ष्यप्रतिबध्नतीयंक
जौतद्ऊंकार[illegible]वनाली॥१४॥धार्यःकथंकारमहंभवत्यावियद्विहारीवसुधैकगत्या॥अहोशिशुत्वंतवखंडितंनस्मरस्यसख्यावयसाप्यनेन॥१५॥स्व
स्वर्गापगाहेममृणालिनीनांनालामृणालाग्रभुजोभजामः॥अन्नानुरूपांतनुरूपऋद्धिंकार्यंनिदानाद्धिगुणानधीते॥१६॥सहस्त्यपत्रासनपत्रहंसवं

माय१० वर
७नहंसा

गिरा२ ताँ४ वंपैः२

त्रास्युपत्राणि पतत्रिणः स्म॥ अस्मादृशां वा दुरसाम्रता नि स्वर्लोकिलोकेतरदुर्लभानि॥१७॥ धातुर्निदेशादिह नैषधीयं लीलासरः सेवितुमागतेषु॥ हैमे
षु हंसेष्वहमेक एव भ्रमामि भूलोकविलोकनोत्कः॥१८॥ विधेः कदाचिद्भ्रमणीविलासे श्रमातुरेभ्यः स्वमहत्तरेभ्यः॥ स्कंधस्य विश्रांतिमदां तदादिश्रा
न्यापि नाविश्रमविश्वगोपि॥१९॥ बंधाय दिव्ये न तिरश्चि कश्चित्पाशादिरासादितपौरुषः स्यात्॥ एकं विना मादृशि तन्नरस्य स्वर्भोगभाग्यं विरलोदयस्य
॥२०॥ इष्टेन पूर्तेन नलस्य वश्याः स्वर्भोगिमत्रापि सृजंत्यमर्त्याः॥ महीरुहा दोहदसेकशक्तेराकालिकं कोरकमुद्गिरंति॥२१॥ सुवर्णशैलादवतीर्य तत्र
र्णं स्वर्वाहिनीवारिकणावकीर्णैः॥ तं वीजयामः स्मरकेलिकाले पक्षैर्नृपं चामरबद्धसख्यैः॥२२॥ क्रियेत चेत्साधुविभक्तिचिंता व्यक्तिस्तदा सा प्र
थमाभिधेया॥ या स्वौजसां साधयितुं विलासैस्तावत्क्षमा नामपदं बहु स्यात्॥२३॥ राजा स यज्वा विबुधव्रजत्रा कृत्वाध्वराज्योपमयैव राज्यं॥ भु
क्ते श्रितश्रोत्रियसात्कृतश्रीः पूर्वं त्वहो शेषमशेषमंत्ये॥२४॥ दारिद्र्यदारिद्र्यविणौघवर्षैरमोघमेघव्रतमर्थिसार्थं॥ संतुष्टमिष्टानि तमिष्टदेवं नं
धंति के नाम न लोकनाथं॥२५॥ अस्मत्किल श्रोत्रसुधां विधाय रंभा चिरं भामतुलां नलस्य॥ तत्रानुरक्ता तमनाप्य भेजे तन्नामगंधान्नलकूबरं सा॥२६॥
स्वर्लोकमस्माभिरितः प्रयातैः केलीषु तद्गानगुणान्निपीय॥ हा हेति गायन्यदशोचि तेन नाम्नैव हाहा हरिगायनोभूत्॥२७॥ शृंगारभंग्या सदृशस्तदुदार
सावं हृष्यन्स ऊर्ध्वमिषु लोमभिरायाः॥ पुण्येन नालोकतलोकपालैः प्रमोदबाष्पावृतनेत्रमालैः॥२८॥ सोपीश्वरे शृण्वति तद्गुणौघान्प्रसह्य चेतो हरतोर्द्ध
तांशुः॥ अलब्धपर्णांगुलिरुद्धकर्णकिदामकंडूयनकैतवेन॥२९॥ अलं सजन्धर्मविधौ विधाता रुणद्धि मौनस्य मिषेण वाणीं॥ तत्कंठमालिंग्य रसस्य
तृप्तां न वेद तां वेद जडः स वक्त्रां॥३०॥ श्रियस्तदालिंगनभूर्न भूता व्रतक्षतिः कापि पतिव्रतायाः॥ समस्तभूतात्मतया न भूतं तद्भर्तुरीर्ष्याकलुषापि न
पि॥३१॥ धिक्तं विधेः पाणिमजातलज्जं निर्माति यः पर्वणि पूर्णमिंदुं॥ मन्ये स विज्ञः स्मृततन्मुखश्रीः कृतार्धमौज्झद्भवमूर्ध्नि यस्तं॥३२॥ निलीयते ह्रीविधु
रः स्वजैत्रं श्रुत्वा विधुस्तस्य मुखं मुखान्नः॥ सूरे समुद्रस्य कदाचिदूर्ध्वे कदाचिदभ्रभ्रमदभ्रगर्भे॥३३॥ संप्राप्य नः स्वध्वजसत्यवर्यान्दैत्यारिरत्यब्जनलास्य
तुल्ये॥ क्रीसंकुलत्वात्तिसरोजपीताद्बालबिलज्जं रमते रमा...॥३४॥ रेखाभिरास्ये गणनादिवास्य द्वात्रिंशता दंतमयीभिरंतः॥ चतुर्दशाष्टादशचात्र
विद्याद्वेधापि संतीति शशंस वेधाः॥३५॥ श्रियौ नरेंद्रस्य निरीक्ष्य तस्य स्मरामरक्ष्मावपि न स्मरामः॥ वासेन सम्यक्समयोश्च तस्मिन्बुद्धौ न दध्मः खलु वां प
बुद्धौ॥३६॥ विना पतत्रं विनतातनूजैः समीरणैरीक्षणलक्षणीयैः॥ मनोभिरासीदनणुप्रमाणैर्न लंघिता दिक्कतमा तदश्वैः॥३७॥ संग्रामभूमीषु
भवत्यरीणामस्त्रैर्नदीमातृकतां गतासु॥ तद्बाणधारापवनाशनानां राजव्रजीयैरसुभिः सुभिक्षं॥३८॥ यशो यदस्याजनि संयुगेषु कंडूल

क्र२

तमुत्थितं नयनाविषिशं पुनाभ्युवन शांतिकहोमहविःहुतः। तवव यस्थमपास्यम धूमधूं हतवताहरिणावत किंहृतं॥१००॥ इति क्रियद्वचसैव कृशांगिया धुरपिपा
सुतरां नमाश्रुनत॥ आजनिपांसुलमप्रियवाग्भ्रमं गजलन्मदनशोषणबाणहतेव दिव॥१॥ प्रियसखीनिवहेन सहाथ सा व्यस्वरयत्स्मरमर्द्धसमस्यया॥ हृदयमर्मणि मन्म
थसायकैः क्षततमा बहुसा षितुमक्षमा॥२॥ अकरुणादवसूनशरादसून सहजयाः पदि धीरतया सनः। असुखवएव ममाद्य विरोधिनः कथमरीन्स खि रक्षि
तुमाद्यमां॥३॥ हितगिरं न शृणोषि किमाश्रवे संप्रसक्ष मध्यवजीवितमात्सनः॥ सखि हिता यदि मे सवसीदशी मदरिमिह सियाममजीवितं॥४॥ अमृतदीधितिरेष
विदर्भजे भजसि तापमसुष्य किमंशुभिः॥ यदि तवं तिमृताः सखि चंद्रिकाः शशभृतः क्व तदा परितप्यते॥५॥ ब्रज ध्रुवं तिंत्यज सीतिमहेतुकामयमत्र चंडमरीचिरेष
तौ। ज्वलयति स्फुटमातपमुर्मुरैरनुभवं वचसा सखि लुंपति॥६॥ अयि शपे हृदयाय तवैव तद्यदि विधोर्नरुचेरसि गोचरः॥ रुचिफलं सखि दृश्यत एव यज्ज्वल
यति त्वचमुल्कलयत्यसृक्॥७॥ विधुविरोधितिथेरसि धायिनीमपि न किं पुनरिद्धासिको किलं॥ ससख खि किमर्थंग वेषणया गिरं किरति सेयमनर्थमयी मयि॥८॥
हृदय एव तवास्ति स वल्लभस्तदपि किं दमयंति विषीदसि॥ हृदि परं न बहिः खलु वर्तते सखि यतस्तत एव विषद्यते॥९॥ स्फुरति हारमणौ मदनोष्मणा हृदयमप्य
नलं कृतमद्यते॥ सखि हतास्मि तदा यदि हृद्यपि प्रियतमः स मम व्यवधापितः॥१०॥ इदमुदीर्य तदैव मुमूर्च्छ सा मनसि मूर्च्छितमन्मथपावका॥ क्व सहतामबलं
बलवद्विदामनुपपत्तिमतीमपि दुःखिता॥११॥ अपिहितकापि मुखे सलिलं सखी पिधितका पि सरोजदलैः स्तनौ॥ व्यधित कापि हृदि व्यजनानिलं न्यधि
तकापि बिसं सुतनोस्तनौ॥१२॥ उपचचार चिरं मृदुशीतलैर्जलजनालमृणालजलादिभिः॥ प्रियसखीनिवहः सुतथा क्रमादियमवापयथा लघु चेतनां॥१३॥
अथ कलेवरिस श्वसिति स्फुटं चलति पक्ष्म चलेपरिभावय॥ अधरकंपनमुन्नयमेन के किमपि जल्पति कल्पितलेख पश्यु॥१४॥ रचयचासमतिस्तेनयोर्वति
कलयकेशिनि केश्यमसंयतं॥ अवगृहाण तरंगिणि नेत्रयोर्जलमसरा विति शुश्रुविरे गिरः॥१५॥ युग्मं॥ कलकलः स तदालिजनाननादुदलसद्विपुलस्व
रितेरितैः॥ यमधिगम्य सुतालयमीयिवान् धृतदरः स विदर्भपुरंदरः॥१६॥ कन्यांतःपुरबाधनाय यदधीकारान्नदोषान्नृपं द्वौ मंत्रिप्रवरश्च तुल्यमगदंकारश्च
तावूचतुः॥ देवाकर्णय सुश्रुतेन चरकस्योक्तेन जानेऽखिलं स्यादस्या नलदं विना न दलने तापस्य कोपि क्षमः॥१७॥ ताभ्यामभूद्युगपदप्यभिधीयमानं
सेदव्यपालनिमिषः प्रतिघातमेव॥ श्रोत्रे तु तस्य पपतुर्न पतेन किंचिद्प्रेम्याम निष्ठशतशंकितया कुलस्य॥१८॥ श्रुतविगाभितं विप्रयोगचिह्नामपित

सर्ग४
॥१४॥

नयान्तपतिः पदभ्रमणश्रां ॥ आकलय्य दसमाधुगाधिमग्नां झटितिपराशयवेदिनो हि विज्ञाः ॥ १८ ॥ अथ तरदयपितानिशिषंसुतायै नत शिरसे सहसोन्नमय्य मौलिं ॥
दयितमपि मतस्वयंवरेत्वं गुणमयमाप्नुहि वासरैः कियद्भिः ॥ २० ॥ तदनु सतनुजा सखीरवादीनु हिनसुतो गत एव हा दशीनां ॥ कुसुममपि शरायते शरीरे तदुचित
माचरनोपचारमस्याः ॥ २१ ॥ कतिपयदिवसैर्वयस्यया वः स्वयमभिलभ्य वरिष्यते वरीयान् ॥ कृमिमरामनया नयानत दाम्भुरु विरुचिताथ सवद्धि धाविधा
निः ॥ २२ ॥ एवं यद्वदता नृपेण तनया नापृच्छि लज्जापदं यन्मोहः स्मरभूरकल्पि वपुषः पाण्डुत्वतापादिभिः ॥ यच्चाशीः कपटादवादि सदृशी स्यान्नत्वया सांह
नातन्मत्वात्विजनो मनो विस्मितनोदानं दसंरक्षयोः ॥ २३ ॥ ॥ श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं श्रीहीरः सुषुवे जितेंद्रियचयं मामल्लदेवी च यं ॥ तुर्यस्थै
र्यविचारणप्रकरणभ्रातर्ययं तन्महाकाव्ये च यगलन्नलस्यचरिते सर्गो निसर्गोज्ज्वलः ॥ ४ ॥ यावदागमयतेऽथ नरेन्द्रान् स्वयंवरमहाय महीन्द्रः ॥ तावदेवमु
दृ७ निरिंद्रदिदृक्षुर्नारदस्त्रिदशधाम जगाम ॥ १ ॥ नात्र चित्रमनु तं प्रययौ यत् पर्वतः स खलु तस्य सपक्षः ॥ नारदस्तु जगतो गुरुरुच्चैर्विस्मयाय गगनं विललंघे ॥ २ ॥ वद
थं८ गच्छता पथि विनैव विमानं व्योम तेन मुनिना विजगाहे ॥ साधने हि नियमोऽन्यजनानां योगिनां तु तपसाखिलसिद्धिः ॥ ३ ॥ खं द्युते दैंसवनाथ भिमाना लुंघ्यतेस्मसु
निरेषविमानान् ॥ आर्थितोप्यति पितामनुमेने नैव तेष्पतिमिरं घ्रिविन श्रैः ॥ ४ ॥ तस्य तापन क्रिया तापनःस्वं तावदेवसमको न यदर्चिः ॥ यावदेव दिवसेन शशी दुः
वह्रागतपतनतन्महसैव ॥ ५ ॥ पर्यभूदिनमणिं द्विजराजं यत्करैरहरहर्न तदानं ॥ पर्यभूत्खलु कुरैर्द्विजराजः कर्मकः स्वकृतमत्र न भुंक्ते ॥ ६ ॥ विष्टरं तटकुशालि
भिरद्भिः पाद्यमर्घ्यमथ कच्छरुहाभिः ॥ पद्मवृंदमधुभिर्मधुपर्कं स्वर्गसिंधुरदिता तिथयेस्मै ॥ ७ ॥ स व्यतीत्य वियदंतरगाधं नाकनायकनिकेतनमाप ॥ संप्रतीप
पवर्ति धुमनादिब्रह्मशर्मतरस्वायत्तीव ॥ ८ ॥ अर्वनाभिरुचितोऽप्यतराभिस्साऽऽस तं सदसतातिथिमिंद्रः ॥ यावदर्हकरणं किल साधोः प्रत्यवायघुतयेन गुणाय ॥ ९ ॥ २॥
नामधेयसमता सखमद्रेरद्रिभिन्मुनिमथाद्रियताद्राक् ॥ पर्वतोपि लभतां कथमर्चां नद्विजः स विबुधप्रभुलंसी ॥ १० ॥ तद्भुजादतिवितीर्णसपर्यात् पर्युषा
न पि विवेदमुनींद्रः ॥ स्वःसहस्थितिसुरिक्षितयाता न्दानेपारमितयैव वदान्यान् ॥ ११ ॥ प्रीतितान्यजनसंकथनः सन्नारदं बलरिपुः समवादीत् ॥ आकरः स्वप
रभूरिकथानामाशयशोहि सुहृदोः सहवासः ॥ १२ ॥ तं कथानुकथनप्रसृतायां दूरमालपनकौतुकितायां ॥ प्रष्टुं तां चिरमागतिहेतु सालभिच्छुरवदच्छ ॥१४॥
तमन्युः ॥ १३ ॥ भागिवप्रसुवते नृपवंशाः किंतु संप्रति न वीरकरीरान् ॥ ये परप्रहरणैः परिणामे विक्षताः क्षितितले निपतंति ॥ १४ ॥ पार्थिवं हि निज नार

वि१

भ्राजिष्णुनीराहरमुर्द्धगमनस्यैरोधि।।गौरवाद्दृष्टुरपास्यनजंतेमत्वतामतिथिगौरवकृद्धिं।।१५।।सान्निध्यापमिवनातिथ्यस्तेमांयदघन्नगवन्नुपयां
ति।।तेननश्रियमभिमांबकुमन्येस्वोदरेकृतिकार्यवृदयी।।१६।।फलवेपुण्यविभवव्ययसृष्टाःसंपदोविपदएवविमृष्टाः।।पात्रपाणिकुमलार्पणमासांतासु
शांतिकविधिर्विधिदष्टः।।१७।।तद्दिमज्यममसंशायकारिस्फीतमन्त्रविषयेसहसाघं।।स्त्यतांभगवतःश्रुतिसारैरघवाभिरघमर्षणकृभिः।।१८।।
इत्युदीर्यमघवाविनयर्द्धिंवर्द्धयन्नवहितत्वमरेण।।चक्षुषांदशशतीमनिमेषांतस्थिवान्मुनिमुखेप्रणिधाय।।१९।।वीक्ष्यतस्यविनयेपरिपाकंपाकशासन
पदंस्यशातोपि।।नारदःप्रमदगद्गदयोत्स्याविस्मितःस्मितपुरःसरमारव्यत्।।२०।।निश्चितानातमखीसुखसंतयन्त्तपरिश्रमविदःस्वविन्नतो।।तत्फलेतवपरं
यदिहेत्थाकेनालंजमधिकाहरदंतु।।२१।।संपदस्तवगिरामपिदूरायन्ननामविनयंविनयन्ते।।श्रद्धधातिकइवेहनसाक्षाद्दाहवेदनुभवःपरमापैः।।२२।।श्रीमरांति
थिसास्करवाणिस्वोपभोगपरतानहितेति।।पत्र्यतोबहिरिवांतरपीयंदृष्टिस्पृष्टिरधिकांतवकापि।।२३।।आःस्वचावमधुरेरनुभावैस्तावकैरतितरांतैर्लाःस्मः।।
पांप्रजाधिगलिताववधिकालंसाधुसाधुविजयस्वबिडौजः।।२४।।संस्थविस्ततनुस्त्रवदस्त्रक्षालितारिवलनिजाघलघूनां।।यस्त्वैहानुपगमःप्रणुराज्ञांवं
जगधुवमुदन्तमुदंतं।।२५।।सामुवःकिमपिरत्नमनघ्यत्र्यणंजयतितत्रकुमारी।।सीमस्रूपतनयादमयंतीनामयामदनशास्त्रममोघं।।२६।।संप्रतिप्रतिमुहूर्त
तोमपूर्वीकापियौवनजवेनभवन्ती।।आश्रिरवसुरतसारभतेसाकापियनिसजतेकिलभावं।।२७।।वध्यतेनकृतमःसइतित्वंमांविविस्तरस्निकिंचलदोष्ठः।।अ
र्द्धवर्त्मनिरूणत्सिनपद्यांनिगर्भेणानपरिश्रमयैनं।।२८।।यत्पथाविधिरणुपरमःसायोगिधीरपिनपश्यतियस्मात्।।बालयानिजमनःपरिमाणेनोक्तीदरीक्षा
यहरीहृतमेनं।।२९।।साशारस्यकुसुमस्पशारव्यंसूचिताविरहवाचिन्निरंगैः।।तातचित्तमपिधातुरधत्तस्वस्त्वयंवरमहायसहायं।।३०।।मन्मथाययदथादि
तराज्ञांकृतिहत्पिनिर्वर्त्यविधयेविधिराज्ञां।।तेनततपरवशाःपृथिवीशाःसंगरंगररभिवाकलयेति।।३१।।येषुयेषुसरसादमयंतीभूषणेषुयदिवापिगुणेषु।।त
त्रतत्रकलयापिविशेषोयःसहिक्षितिभृतांपुरुषार्थः।।३२।।नोत्रावव्ययदिनावधितस्यायोवनोदयनिराजसमाजे।।आदरादहरहःकुसुमेषोरुल्लसन्गया
त्रिनिवेशाः।।३३।।इत्यमीवसुमतीकुमितारःसादरास्वदतिधीरवितुंन।।नीमभूसुरमुवीरभिलाषेहूरमंतरमहोनृपतीनां।।३४।।तेनजाग्रदधृतिर्दिवमागांसं
स्यसौख्यमनुसर्तुमनुत्तां।।यन्मघंक्षितिसृतांनविलोकेतन्निमग्नमनसांनुविलोके।।३५।।वेदयघपिनकोपिभवंतंहंतहंत्रकरुणंविरूणद्धि।।पश्यसेतदपियेनवि
वेकप्रोंघनायविषयेरससेवः।।३६।।एवमुक्तवतिदेवऋषींद्रेद्रागजेदिमघवाननमुद्रा।।उत्तरोत्तरशुभोहिविभूनांकोपिमंजुलतमःक्रमवादः।।३७।।कानुजेममनि
जेदनुजारोजाग्रतिस्वशारणेरणचर्चा।।यन्नुजांकुमुपधायजयांकंशर्मणास्वपिमिवीतविशंकः।।३८।।विश्वरूपकलनादुपपन्नंतस्यजैमिनिमुनित्वमुदीये।।वि

दु१

नै९
र७
त्रि

यसर्ग५
॥१५॥ हं१

यैः मरवत्सुतानमसहिष्णुर्व्यर्थतां मदत्रानिं स्तनिनाय॥४१॥ ईदृशानि मुनये विनयाद्यि क्षिप्तस्त्विन्द्रवचनान्युपहस्य॥ प्रांशुनिश्वसितपक्षनरीवाङ्गारदस्य
निरियाय निरोजाः॥४०॥ स्वारसातळमबाहनत्राकीनिर्वणोभिनवसन्वसुमत्यां॥ घांगतस्य हृदि मेडुरूदर्कः स्मातव्ळद्वयविभाजिवितर्कः॥४१॥ वीक्षितस्त्वम
सि मा मथगं तुं तन्मनुष्यजगतें नुमनुष्य॥ किं नुवः परिवृढानविनोदुं तत्र तामुपगताविवदंते॥४२॥ इत्युदीर्य स ययौ मुनिरुर्वीस्वर्पतिं प्रतिनिवर्त्य बळेन॥ नारितो
गमाय४ प्यनुजंगाममसयत्नमतं द्विर्यंत्यपि पदान्यपराणि॥४३॥ पर्वतेन परिपीय गभीरं नारदीयमुदितं प्रतिनेदे॥ स्वस्य वश्चिदपि पर्वतपक्षच्छेदिनि स्वयमदर्शिनपक्षः॥४४॥
पाणये बळरिपोरथ नैमीत्रीत कोमळकरग्रहमर्ही॥ स्वेष जं चिरस्थिता त्रानिवासव्यापदामुपदिदेश शरतीत्राः॥४५॥ नाकलोकभिषजोः सुषमायाः पुष्पचापमपि
चुंबितिसेव॥ वेभिता दगणिपन्यदसौ तद्दूरसंक्रमितवेघुवविघः॥४६॥ मानुषीमनुसरत्यथपत्यौ खर्वभावमवलंब्य मघोनी॥ खंडितं तं निजमसूचयदुच्चैर्मी
नमाननसरोरुहनुत्या॥४७॥ योमघोनि दिवमुच्चरमाणे रंभया मळिनिमाळमलंभि॥ वर्णएवसखलूज्वलमस्याः ज्ञातमांतरमनाथततंग्या॥४८॥ जी
निते नदृतमप्सरसां ते त्राणमुक्तिरिहयुक्तिमतीनः॥ इत्यनस्सरमवाचि घृताच्यादीर्घनिश्वसितनिर्गमनेन॥४९॥ साधुनः पतनमेव मितःस्यादित्यमन्मपततित्वे
न मयापि॥ चामरस्य पतनेन करात्तछिलोकनचलदुजनाळात॥५०॥ मेन कामनसितापमुदीतं यत्पिधित्सुरकरोदवहित्थां॥ तत्स्फुटं निजहृदः पुटपाकं पं
कूलि पिमसृजद्वहिरुत्थं॥५१॥ उर्वशीगुणवशीकृतविश्वातत्क्षणास्ति मितभावनिमेन॥ त्राक्सौहृदसमापनसीमस्तं मकार्यमपुषद्वपुषेव॥५२॥ कापिकाम
पिबमाणबुभुत्सुं प्रेणवतित्रिदशाभर्त्तरि किंचित॥ रथकृत्यपसुतामनुगंतापश्यकश्यपसुतःत्रातमन्युः॥५३॥ आळिमालमनुगत्व सगर्वा कापि भ्रूणवतिमघो
निवक्षाचे॥ वीक्षणेपिसघृणासि नवर्णंकिंयासि न त्वमपिसार्वगुणेन॥५४॥ अन्वयुर्युतिपयःपितनाथास्तं मुदाथ हरितां कृमितानः॥ वर्त्मकर्षतु पुरः परमेकः
स्तनृतानुगतिकोनमहार्घः॥५५॥ प्रेषिताः पृथगथो दमयंत्यै चित्तचौर्यचतुरा निजदूत्यः॥ तत्र तं प्रति च तैरुपहाराः संख्यसौख्यकपटेन निगूढाः॥५६॥ चित्रमत्र
विबुधैरपि यत्तैः स्वर्विहाय बत मर्त्युसत्त्वे॥ द्योर्न काचिदथवास्तिनिगूढा सेव सावतिलतियत्रहिचित्तं॥५७॥ शीघ्रलंघितपथैरथवाहैर्लंभिता भुवममीसुर
सारः॥ विक्रितोन्नमितकंधरवेधाः शुक्रधुर्ध्वनितमध्वनिदूरं॥५८॥ किं घनस्यजलधेरथवैवंनैवसंशयितुमप्पलमंत॥ स्यंदनं परमहरमपश्यन्निस्वन
श्रुतिसहोपनतं ते॥५९॥ स्तंतविश्रमदकौतुकिभावं भावबोधचतुरं तुरगाणां॥ तत्र नेत्र जनुषः फलमेते नैषधं बुबुधिरे विबुधेशाः॥६०॥ वीक्ष्य तस्य वरुणस्त
रुणत्वं यद्वमारनिबिडं जडमन्यं॥ नोचितीजळपतेः किमुसास्य प्राज्यविस्मयरसस्तिमितस्य॥६१॥ रूपमस्य विनिरूप्य तथाति म्लानिमापरविवंशावतंसः॥ की
द१ र्तितेयधुनापिसदेवः काळएव सबलेनजनेन॥६२॥ यं बभार दहनः खलु तापं रूपधेयमदनस्य विमृश्य॥ तत्र भूतदृष्टेनेतोजनिवन्नीमातदप्यनळतैवतुहेतुः॥६३॥

राम
॥१५॥

लं१

कामनीयकमधःकृतकामं काममद्य दिवि वीक्ष्य तदीयं॥ कौशिकः स्वमखिलं परिपश्यन्मन्यते स्म खलु कौशिकमेव॥६४॥ रामणीयकगुणाद्वयवादं मूर्त्तमुल्लिखितमसुं परीक्षा
व्यय॥ विस्मयाय हृदयानि वितेरुः स्वैरतो न तेषु न सुराः प्रबभूवुः॥६५॥ ज्ञेयरूपकविशेषनिवेशैः संवदद्भिरमराः श्रुतपूर्वैः। एष एव स नलः किमिति द्राङ्मंदमंदमितरेतरमूचुः॥६६॥
तेषु तद्विधवधूवरणार्थं हृत्स्वरूपणं स समयः सरयाधा॥ वृत्यकुंडिनपुरं प्रति सर्पन्नृपतेर्थ्यविलसिताधिशाशंसुः॥६७॥ धर्मराजसलिलेशहुताशैः प्राणतां प्रियतममुं जगतस्तैः॥
आप्य हस्तचलविस्तृततापे श्रीतरसानि श्रमेत दर्चिंता॥६८॥ नैवनः प्रियतमो स यथा सोयमर्जुनवणुते न वृणुते वा। एकतो हि धिगमं सगुणज्ञामन्यतः कथमदः प्रतिलंभः॥६९॥
मां वरिष्यति तदायमिंद्रियमत्तो वेदनेयमियदस्य महत्त्वं। ईदृशी च कथमाकलयित्रीमद्विशेषमपरान्नृपपुत्री॥७०॥ नैषधे बत वृते दमयंत्या व्रीडितान हि बहिः सविताः स्मि। स्वांग
हे पिवनिताः कथमास्यं हा निमीलि खलु दर्शयिताहे॥७१॥ इत्यवेत्य मनसात्मविधेयं किंचनापि विबुधा बुबुधेन। नाकनायकमपास्य तमेकं साम्य पश्यति परस्परमास्यं
॥७२॥ किं विधेयमधुनेति विमुग्धं स्वाननानुगाननमवेक्ष्य मुहुस्ताः। शास्तृतिस्म कपटे पटुरूचे वंचनं समसिलब्धमनल्पं॥७३॥ सर्वतः कुशलवानसि कच्चिद्धंसनैषधश्र
तिज्ञतिकानः। स्वासनार्द्धसुहृदस्त्वयि रेखां वीरसेननृपतेर्दिवि वर्णै[illegible]ः॥७४॥ ब्रूमयास्य सिनलेलत्वम्नु छाययाचयाचश्रुतयाज नियन्नः॥ तत्तयैव फलसत्वरया
त्वं नाधुनो धेद्धमिदमागमितः किं॥७५॥ एष नैषधसदंशुकस्वेषत्यालज्जालज्जदिलः सकृताशाः॥ यादसांसपतिरेष च शेषं शासितारमधिगच्छसुराणां॥७६॥ अर्थि
नो वयममी समुपेमस्त्वां नलेति फलितार्थमवेहि॥ अध्वनः क्षणमपास्य च खेदं कुर्महे सवतिकार्यनिवेदं॥७७॥ ईदृशीं गिरमुदीर्य बिडौजा जोषमासन विहाय बभावे॥
नात्र चित्रमभिधाकुशलत्वे शैशवावधि गुरोः गुरुरस्य॥७८॥ अर्थिनामहपिता खिलरोमास्वं नृपः स्फुटकदंबकदंबं॥ अर्चयन्निव तदंघ्रिरणानां सञ्जणाम करुणाद्रुपनि
न्ये॥७९॥ दुर्लभं दिगधिपैः किममीभिस्तादृशं कथमहो मदधीनं॥ ईदृशं मनसि कृत्य विरोधं नैषधेन समशायि चिराय॥८०॥ जीवितावधि वनीपकमात्रैर्याच्यमा
नमखिलं सुलभं युतः॥ अर्थिने परिवृढाय सुराणां किं वितीर्य परितुष्यतु चेतः॥८१॥ सोमजा च हृदि मे परमास्ते जीवितादपि धनादपि गुर्वी। नस्वमेव मम सार्हति य
स्याः षोडशमपि कलां किल नो वः॥८२॥ मीयतां कथमभीप्सितमेषां दीयतां द्रुतमयाचितमेव॥ तं धिगस्तु कलयन्नपि वांछामर्थिवागवसरं सहते यः॥८३॥ प्रापि
तेन च टुकाकु विडंबं लंभितेन बटु याचनलज्जां॥ अर्थिना यदधमर्जति दाता तन्न लुंपति विलंब्य ददानः॥८४॥ यत्प्रदेयमुपनीय वदान्यैर्दीयते सलिलमर्थि
जनाय। सोर्थिनो जिग्विफलत्व विशंकात्रासमूर्च्छदुपमंत्युचिकित्सा॥८५॥ अर्थिवैनतृणवद्धनमात्रं किंतु जीवनमपि प्रतिपाद्यं। एवमाह कुशवज्जलदायी द्रव्यदा
नविधिरुक्तिविदग्धः॥८६॥ पंकसंकरविगर्हितमर्हं न श्रियः कमलमाश्रयणाय॥ अर्थिपाणिकमलं विमलं तद्वासवेश्म विदधीत सुधीस्तत्॥८७॥ याच्यमानजनमान

नै ८

शि ८
ना ७

नै २ दू १

घसर्ग ५
॥१६॥

सवृत्तेः पूरणाय बत जन्मनयस्य ॥ तेनम्भ्रमिरीति भार वृतीयं नद्भुमैर्न गिरिसिर्न समुद्रैः ॥ ८८ ॥ माधनानिरूपणः खलु जीवन्नक्षयार्पयतु जानुपरस्मै ॥ नन्वचैष कुरुतेम
मचित्तंयत्तुनार्पयितनानिमृतोपि ॥ ८९ ॥ मामममीत्ति रिहयाचितवद्दुर्दान्तजातमेवमत्यजगत्यां ॥ पद्मशोमथिनिवेषितमेतन्निभ्रमोस्तु कृतमस्तु तदीयः ॥ ९० ॥ लोक
रक्षपरलोकसुखेनाहा विहायनिघनेधनमेकः ॥ इत्समुरवलु तस्य निनीषत्सर्पिथंबंधुरस्यदृपचित्तं ॥ ९१ ॥ दानपात्रमणीमिहैकयाहिकोटिगुणितं दिविदायि ॥ सौरितस
ह तैर्यदिकत्तुपारलोकिककुसीदमसीदत् ॥ ९२ ॥ एवमादिसविचिंत्य मुहूर्त्तं तानवोचत पतिर्निषधानां ॥ आर्थितुर्ब्ध समवाप्य सहर्षान्याच्यमानमुरवमुल्लसितश्रीः
॥ ९३ ॥ नास्ति जन्यजनकव्यतिभेदः सत्यमन्नजनितो जनदेहः ॥ वीक्ष्य कः खलु तनूममतादांदद्रुमज्जनमुपैति सुधायां ॥ ९४ ॥ मत्तपःपंक्तैतनुकृफलंवाय्यसमीक्षण
पथं त्रजयेति ॥ ईदृशं परिणमंति पुनर्नः पूर्वपूरुषतपांसि जयेति ॥ ९५ ॥ प्रस्तुतिक्षिपदिनांखलु देवीकर्मसर्वसहनव्रतजन्म ॥ यूयमप्यहह पूज्जनमस्याप ॥ निर्जेः स
जयपादपयोजैः ॥ ९६ ॥ जीविता वधि किमप्यधिकं वायमनीषितभितोनरतुंभात् ॥ तेनवभ्भरणमर्चतु सोयं ब्रूत वस्तु पुनस्तु किमीदृक् ॥ ९७ ॥ एवमु
कवति मुक्तविशोके वीरसेनतनये विनयेन ॥ वक्रभावविषमाम्मयराज्ञः कायकैतवगुरूगिरिमूचे ॥ ९८ ॥ पाणिपीडनमहं दमयंत्याः कामयेमहिमहीमिहिकांशो ॥

नृ९

समयकर्तृनः स्मरसीतिं निर्जितस्मरचिरस्यनिरस्य ॥ ९९ ॥ आसते शतमधिक्षितिरूपास्तोयराशिरसि ते खलु भूपाः ॥ किंतु हार्दिविनजायति ते ते भास्वकुरस्यकनमे
स्तुलयास्ते ॥ १०० ॥ विश्वदृश्वनयनाचयमेवलब्धुणांबुधिमगाधमवेमः ॥ लामिहैवमानिवेश्यपरहस्ये निर्व तिनहिलक्ष्मेमहिसेवे ॥ १ ॥ भूद्धवं राजनितोपि गुणस्य

नु ८

स्थाननामनुसवन्नपिशंकः ॥ क्षि रेनम्मजुमांशुसपक्षंसायकंपञ्चुरिवाजनिवक्रः ॥ २ ॥ तेनतेनवचसैवमघोनः स्वस्नवेदकपटं पटुरुद्धः ॥ आचरनृदुचिताम

हि९

वाणीमार्जवं कुटिलेषु न नीतिः ॥ ३ ॥ आस्येयमुच्चतरताडरितानामन्यजन्मनिमयैवहतानां ॥ युष्मदाश्रयमपियामहिमानं मेतुभिद्यतिकेधपयपारं ॥ ४ ॥ विल्यन्वित
मखिलस्यनकुर्याधुर्यकार्यपरिपंथितुमौनं ॥ ह्री गिरास्तुवरमस्तु पुनर्मास्त्वीलतैवपरवागपरास्ता ॥ ५ ॥ यन्मतोविमलदर्पणिकायां सन्मुखस्य मदिलखलुन
त्वं ॥ तेपि किं वितरथैदृशमाज्ञां यान मस्य सदृशी चितरीढं ॥ ६ ॥ यामियामिहवरानुमहातद्भुततांतुकथंवः ॥ ईदृशां नमह तावतजानावंचनैममत्तणस्यघृणापि ॥

दू३

॥ ७ ॥ उत्क्रमामि विरहाहवकुप्यस्यामोहमेमिचमुहूर्त्तमहंयः ॥ ब्रूत वः प्रसवितास्मि रहस्यं रक्षितुं सकथमीदृगवस्थः ॥ ८ ॥ यांमनोरथमयीं हृदि सायः
श्यसिम्यथकथं सतदग्रे ॥ भावगुप्तिमवलंबितुमीशो दुर्जयाहि विषया विदुषापि ॥ ९ ॥ यामिकानतुपमस्घनमादृत्त्यां निरीक्षितुमपि क्षमते कः ॥ र
क्षिलक्षजयचं उवरित्रे पुंसि विश्वसिति कुत्र कुमारी ॥ १० ॥ आददीधि चिल्लदातलकताघ्रंघ्राणमात्रपणसीमयशो मत् ॥ आददेकथमहं प्रियया

मध ३

नु ५

दू १

करवाणि ४

॥१६॥

चा०टी० १

तस्माणतः शतगुणेन पणेन ॥ ११ ॥ अर्थना मयि भवद्भिरिवास्य कर्तुमर्हति मयापि स खलु ॥ त्वामजार्थपरयाचनयाँचैँ पयमेव गुरवः करणीयाः ॥ १२ ॥ अर्थिता
प्रथमतो दमयंतीं यूयमन्वसमुपास्य मयायं ॥ फीर्नचेद्ध्वनियतामपि तद्वः साममापि सुतरां न तदस्तु ॥ १३ ॥ कुंडिनेंद्रसुतया किल पूर्वं मां वरीतुमुररीकृतमास्ते ॥
(पि३) ब्राउमेव्यतिपरं स्वयदत्तस्वीकरिष्यति न सा खलु युष्मान् ॥ १४ ॥ तन्मयासीदत विघत्तन खेदं हृत्यमत्यसदृशो हि ममेदं ॥ हास्यतैव सुलभा न तु साध्यं तद्विधित्सु त्ति
रन्नौपयिकेन ॥ १५ ॥ ईदृशानि गदितानि तदानीमाकलय्य स नलस्य बलारिः ॥ शंसति स्म किमपि स्मयमानः स्वानुगाननविलोकनलोलः ॥ १६ ॥ नास्य धीर्यदि न
(षु५) पवेस्व तवेदं रोहिणीरमणवंशभुवेव ॥ लज्जते न रसना तव वाम्यादर्थिसंचयमुरीकृतकाम्या ॥ १७ ॥ संगुरंन वितथं न कथं वा जीवलोकमवलोकयसीमं ॥ येन घ
र्मयशसी परिहातुं धीरहो वलति धीरतवापि ॥ १८ ॥ कः कुले जनि जगन्मुकुटे वः प्रार्थकेप्सितमपूरि न येन ॥ इंदुरादिरजनिष्ट कलंकी कष्टमत्र स भवान् पिमाभून् ॥ १९ ॥
(चे७) याः पदष्टिरपिपासु[illegible]रवमुद्रायाचमानमनुयोनतुष्टिः ॥ बादशास्य सकलः सकलंकः शीतभास्विशशाकः परमंकः ॥ २० ॥ नाक्षराणि पठता किमपाठि [illegible]
विस्मृतः किमथवा पठितो पि ॥ इत्थमर्थिचयसंशयदोलाखेलनं खलु चकार नकारः ॥ २१ ॥ अब्रवीत्तमनलः क्व नलेदं लब्धमुज्झसि यशः शशिकल्पं ॥ कल्प
वृक्षपतिमर्थिनि मिथ्यं नापकीर्तिपिशितमन्युमिहान्यः ॥ २२ ॥ न व्यहन्यत कदापि मुदं यः स्वः सदामुपनयन्नभिलाषः ॥ तत्पदे त्वदभिषेककृतान्तः सत्यजत्यसमता
मदमद्या ॥ २३ ॥ अब्रवादथ यमस्तमहर्षं वीरसेनकुलदीपतमस्त्वां ॥ किंमेमप्यमिवुधं प्रतितिष्ठति चंद्रवंशवसुतेः सदृशं ते ॥ २४ ॥ रोहणः किमपि यष्कठि नानांका
मधेनुरपि याप्युरेव ॥ नैनयोरपि वृथा भवदर्थस्तहाविधिल्लुरसि वत्स किमेतत् ॥ २५ ॥ याचितश्चिरयति क्व नु धीरः प्राणने क्षणमपि प्रतिभूः कः ॥ शंसति द्विनयनी
दृढनिद्रा भ्रूविमेषमिषघूर्णनपूर्णा ॥ २६ ॥ अन्नपुष्पमपि दित्सति शीतं सार्थिना विमुखता यदि भाजि ॥ स्तोककस्य खलु चंचुपुटेन म्लानिरुल्लसति तत्र घन
संघे ॥ २७ ॥ ऊचिवानुचितमक्षरमेनं पाशपाणिरपि पाणिमुदस्य ॥ कीर्त्तिरिव भव तां प्रियदारा दाननीरकर मौक्तिकहारा ॥ २८ ॥ चर्म वर्म किल यस्य न भेद्यं यस्य
वज्रमयमस्थि च तौ चेत् ॥ स्थायिनाविह न कर्णदधीची तन्न धर्ममव धारय धीर ॥ २९ ॥ अघयावदपि येन निबद्धौ न प्रभू विचलितुं बलिविंध्यौ ॥ प्रार्थितावि
नयता गुणपाशस्तादृशास्तव विदुर्भरपास्तः ॥ ३० ॥ प्रेयसा जितसुधां मधुरस्य श्रीयनिर्मुंचति दिग्गंतगतापि ॥ संगिसंगमकुरंगदृगर्थे किं कदर्थयति तामपि कीर्ति
॥ ३१ ॥ यान्वरं प्रतिपरे र्थयितारस्ते पियं वयमहो सपुनस्त्वां ॥ नैव नः खलु मनोरथमात्रं भ्रष्टपस्पर्द्दिशो पियशोभि ॥ ३२ ॥ ओघपांडु गगनं स्फुरशारदीकेवलेन कुसुमे
न विघत्तां ॥ अर्थितां सयिगतेषु सुरेषु म्लानदानजनितोरुयशः श्रीः ॥ ३३ ॥ भवसते सरनाज्जनिवैन्यकस्मिंतघनोपिनलमसोवदंश्च ॥ स्वगमनाफलतायीदशंकसेतद

श्री ७

घसर्ग५
१८॥

नः३

फलं निखिलं खलु मंगलं॥३४॥ इत्थं नः प्रतिनो प्रतिश्रुतिरभूद्धा घस्वरह्लादिनी धर्मार्थं स्तजतां श्रुतिप्रति सहीकृत्यान्वितारस्यापदा॥ त्वत्का तिं पुनती पुनस्त्रिभुवनं श्र
व्याह्मयादेशनात्प्याणि शितिपीनत्लो हितहरिन्मा मान्यं यं लुंपतु॥३५॥ यं प्रासूत नमहत्स्रपादुदत्ते वस्यादेन स्वजः कथं स छायातनयः सुतः किल पितुः सादृश्यमन्वि
च्छति॥ एतस्योत्तरमर्घसम्कमिलव जसं लंघने साहसैरपि पंगुरांघ्रिभिर सिष्यक्की स व भानुमान्॥३६॥ द्रसा कर्णं क्षितोश स्त्रिदशा परिषद स्लारी स्त्रीगुण
सर्वे दर्श कामुको पिअसस विनिहितं त्रैस सारं बभार॥ अंगीकारं गते सिन्न मरपरिवठः संभ्रतानं दमस्व स्यादंत दि सिद्धेरनुविहित भवत्रितयाय त्रतत्र
॥३८॥ ॥श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं श्रीहीरः सुषुवे जितेंद्रियचयं मामल्लदेवी च यं॥ तस्य श्रीविजयप्रशस्तिरचनातातस्य नव्ये महाकाव्ये चा
रुणि नैषधीयचरिते सर्गोगमत्पंचमः॥५॥ ॥दूत्याय दैत्यारिपतेः प्रवृत्तो द्विषां निषेद्धा निषधप्रधानः॥ स भीमभूमीपतिराजधानीं लक्षीचकाराथ रथस्य
दूरात्॥१॥ भैम्यासमं नाजगणद्वियोगं सहत धर्मं स्थिरधीरधाराः॥ पयोधिपाने मुनिरंतरायं दुर्वारमप्यौर्वमिवौर्वशेयः॥२॥ नलप्रणालीमिलदंबुजाक्षीसंवा
दपीयूषपिपासवस्ते। तदध्वनी ध्वाध्वमिवानिमेषा देशास्यनस्याश्रणी बभूवुः॥३॥ तां कुंडिनाख्यापदमात्रगुप्तामिंद्रस्य सस्मेरमरावतीसः॥ मनोरथः सिद्धिमि
व क्षणेन रथस्तदीयः पुरमाससाद॥४॥ भैमीपदस्पर्शनितार्थरथ्यासेयं पुरीत्युत्कलिकाकुलस्तां॥ नृपो निपीय क्षणमीक्षणाभ्यां स्पर्शं निराश्वासखुरैः क्षता
